CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ
१

श्रीगणेशाय नमः ॥ ॥ योगिनां चेतः सद्मनि चेतः सद्म एव सद्म गृहं ज्ञानमेव प्रकर्षेण दीपो यस्य एवंभूतो
हरः शंकरः विजयते सर्वोत्कर्षेण वर्त्तते किं कुर्वन्सन् । अंतः अंतरे स्फूर्जत् अपारमोहतिमिरस्य प्राग्भारं समूहं ज्ञानलेश
गणमुच्चाटयन् । पुनः किं कुर्वन् श्रेयोदशाग्रे श्रेयसां पुण्यानां दशा तस्या अग्रे स्फुरन् प्रकटयन् । कथंभूतो हरः चू
डेत्तंसितः उत्तंसितः उत्तंसकृतं चंद्रस्य कलाया चंचन्त्या स्फुरन्त्या शिखया भासुरः दीप्यमानः पुनः कथंभूतः लील

श्रीगणेशाय नमः ॥ चूडोत्तंसितचारुचंद्रकलिकाचंचच्छिखाभासुरो लीलादग्धविलोलकामशलभः
श्रेयोदशाग्रे स्फुरन् ॥ अंतःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयन् चेतःसद्मनि योगिनां विजयते
ज्ञानप्रदीपो हरः ॥ १ ॥ ह्यैग्राहपणं बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः । अबोधोपहता

याद् दग्धः विलोलः चंचलः काम एव शलभः पतंगो येन सो हृदि निसंगलावण्यां १ श्चान्ये जीर्णमंगे सुभाषितं २
बोद्धारः श्रोतारः मत्सरेण ग्रस्ताः मत्सरवंतः प्रभवः समर्थाः स्मयेनाहंकारेण समर्पेण दूषिताः । अन्ये इतरे जनाः अबोधे
न अज्ञानेनोपहताः अज्ञानं प्राप्ताः । अतः सुभाषितं कवित्वमंगे जीर्णं जातं न कोपि पृच्छति स्म गणितं च ॥ २ ॥ ७ ॥

वै०श०
१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संसाराउत्पन्नं चरितं कुशलं मङ्गलं अनुपश्यामि । मे मम अविमृशतः विचारयतः पुण्यानां कामपुण्यानां विपाकः फलं भयं
जनयति उत्पादयति । एवं सति पुण्यौघैः महद्भिः विषयाश्चिरकालपरिगृहीताश्च गच्छीनाः तेऽस्माकं विषयिणां
व्यसनमिव दातुं महान्तो जनाः नकुर्वन्ति २ हे मदीयेन स्नेत्वमयापि न संतुष्यामि । न संतुष्टो भवामि त्वत्कृते मया

न संसारोत्पन्नं कुशलमनुपश्यामि चरितं विपाकः पुण्यानां जनयति भयं मे विमृशतः ॥ महद्भिः
पुण्यौघैश्चिरमपि गृहीताश्च विषया महान्तो जायन्ते व्यसनमिव दातुं विषयिणां ३ भ्रान्तं देशम
नेकदुर्गविषमं प्राप्तं न किंचित्फलं त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला । भुक्तं मानवि
वर्जितं परगृहेष्वाशंकया काकवन्मे तृष्णे जृम्भसि पापकर्मनिरते नाद्यापि संतुष्यसि ॥ ४ ॥ ॥

यद्यन्नं तत्र कृतम् । अनेके दुर्गकठिनस्थानैवनैर्विषमदुर्गमदेशे भ्रान्तं भ्रमितं परन्तु किंचिदपि फलं न प्राप्तं । अथ जा
तिः ज्ञातिः कुलं यत्न पात्रस्थितं अभिमानं त्यक्त्वा सेवापि कृता । सा निष्फला गता । अन्यच्च परगृहे प्रमानेन महत्वेन विना आ
शंकया भयेन सह काकवत् मैं । भोजनानि कृतानि तथापि त्वं जृम्भसि । सतोदिनावर्तसे हे पापकर्मणि निरते पापकर्मारते

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हेतुस्मे अन्यदा पित्वया कारितं तत्कुराक्ष। क्षितितलं निधिशंकया उत्खातं सर्वं खनितं तत्र न किंचित्प्राप्तं पश्चा
गिरेः पर्वतस्य धातवः ध्माताः अग्नौ पाकः कृतः तत्रापि न किंचित्प्राप्तं पश्चात्सरितां पतिः समुद्रः निस्तीर्णः समु
द्रं गत्वा सर्वेन देशांतरे उपमार्थं गतं तत्रापि न किंचित्प्राप्तं पश्चात् नृपतयो राजानः प्रयत्नेन सेवया सं

उत्खातं निधिशंकया क्षितितलं ध्माता गिरेर्धातवो निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संतोषिता॥
मंत्राराधनतत्परेण मनसा नीताः श्मशाने निशाः प्राप्तः काणवराटकोपि न मया तृष्णेधुना मुंच मां ५

तोषिताः। परंतु फलं न किंचित् पश्चान्मनसि मंत्राराधनं कार्यमिति उत्पन्नं तदपि तत्परेण सावधेन मनसा मंत्राराधने न श्मशाने निशा रात्रौ नीताः क्रमिताः परंतु मया काणवराटकः स्फुटितकपर्दकोपि न प्रा
प्तः अधुना अतस्तृष्णे मां मुंच ५

ग्रः
२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे आशे त्वयान्यदपि किं कारितं। तच्छृणु। खलानां दुष्टानां आराधने सेवायां तत्परैरस्माभिः खलालापाः खलानां दुष्टाना
आलापाः दुष्टशब्दाः सोढाः सहनं कृतानि कथमपि कष्टेन किं कृत्वा अंतर्बाष्पं हृदनं निगृह्य आवृत्य शून्येन मनसा ह
सितं विना हसितमपि कृतं। एवं प्रकारेण प्रतिहता दुष्टा बुद्धिर्येषां ते खलानां वित्तस्तंभकृतः मनः समाधानं कृतं अंज
लिप्रणामोपि कृतः न किंचिल्लब्धं भवतु नाम त्वमाशे मोघा निष्फला आशा यस्याः सा मोघाशा। अतः परं किं मां नर्तयसि नृत्यं का

खलालापाः सोढाः कथमपि तदाराधनपरैर्निगृह्यांतर्बाष्पं हसितमपि शून्येन मनसा॥ कृतो वित्त १
स्तंभः प्रतिहतधियामंजलिरपि त्वमाशे मोघाशे किमपरमतो नर्तयसि मां॥ ६॥ अमीषां प्राणानां
तुलितविसिनीपत्रपयसां कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितं॥ यदाढ्यानामग्रे द्रविणमदनिः
संज्ञमनसां कृतं त्वानं व्रीडैर्निजगुणकथापातकमपि॥ ७॥

रस्मि॥ ६॥ अमीषां एतेषां प्राणानां कृते कार
णाय अस्माभिः गलितः विवेको येषां तैः किं न व्यवसितं किं न कृतं कृतमेव कथंभूतानां प्राणानां तुलितं सादृश्यं प्राप्तं वि
सिनी कमलिनी पत्रे पयः उदकं यैः तेषां क्षणभंगुराणां यस्मात् द्रव्याढ्यानामग्रे विगता व्रीडा लज्जा येषां ते अ
स्माभिः निजगुणानां स्वकीयगुणानां कथाकथनं तदेव पातकं कृतं कथंभूतानां आढ्यानां द्रविणं द्रव्यं तस्य मदेन निः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ
३

स्वादिष्ठेति। वयं संप्रत्यजनेर्हिंनिश्चितं भोगान् न समीहामहे न वांछामहे। दास्यतेन कृतमर्जनं येषां धनानां
तानि दास्यकृतमर्जनानि तैः यावदमी भिक्षाहृताः शाकचः क्षुधो यतये भवंति संतोषापस्य पादेवीवाक् अस्य
नाम् नः कवीश्वरस्य अक्षरे प्रसवंति प्रसूतेन तेनै वाक्षरेणा वयं नन्नाः संतुष्टाः कथंभूतं अक्षरं मधुना स्वादि
ष्ठं किंभूतं घृतादिरसवत् यथा घृतादिरसैः आस्वाद्यान् क्षीरखंड घृतानीव किं। अमृतात्मनः कवीश्वरस्य रस

स्वादिष्ठं मधुना घृतादिरसवद्यस्याक्षरं देवीवानमृतात्मनो रसबलेनैनेन्नभावयं॥ क्षुधो याव
दमी भवंति यतये भिक्षाहृताः शाक [illegible] यस्य कृतार्जनैर्न किंचिन्ने भोगान्समीहामहे॥ ८ ॥ आदित्य
स्य गतागतैरहरहः संक्षीयते जीवितं व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते॥

तोनस्वरसम्पदस्या॥ ८ ॥ प्रमादमदिरां पीत्वा। इदं जगदुन्मत्तभूतं वर्तते किं कृत्वा मोहमयी प्रमादमदिरां पीत्वा कथम
हरहर्दिनं २ प्रति आदित्यस्य गतागतैर्जीवितं संक्षीयते। ओ [illegible] बहुकार्यभारगुरुभिर्व्यापारैः कालो न वि
ज्ञायते वा न्यजन्मजरा विपोगमरणं दृष्ट्वा अस्थ्यनोत्पद्यते जन्मजरा विपत्तिश्च मरणं न त्रासः अतः का उरु: ३
रणात् प्रमादमदिरां पीत्वा न [illegible] दिरां पीत्वा वृतन्मान यतो जीवितं संक्षीयमाणं नावगच्छति अन्यत्रया

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तां कालो नो जानाति अन्यच्च त्रासो नोत्पद्यते। तथा प्रमदिरां प्रमादमदिरां पीत्वा जीवतत्वं न वेत्ति। अत एव कालमपि न जानाति मरणादि भयो विना संभ्रमं न भवति॥ २॥ दीना दीनेति। को मनस्वी पुमान् अभिमानी पुरुषः स्वदग्धजठरस्यार्थे स्वकीयदुःपूरोदरायेति वदेत् देहीति किं कथं भाषते न भवति तथा गद्गदगलत्त्रुट्यद्विलीनाक्षरं केन याच्ञाया भङ्गभये

दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत्॥
दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बराः क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्येत चेद्गेहिनी॥
याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान्।

ना याच्ञायाः भङ्गः प्रत्याख्यानं तस्य भयं तेन। अन्यच्च चेद्यदि नरैः मनुष्यैः गेहिनी गृहिणी सदैव क्षुधितैः शिशुकैः आकृष्टजीर्णाम्बरा सती विधुरा न दृश्येत। कथं शोभनं विलोक्येत कैः शिशुकैः। क्रोशद्भिः रुदद्भिः किं शिशुकैः दीना दीनमुखैः दीनानि च अतिदीनानि वक्त्राणि येषां तैः दीनास्यैः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहो इत्याश्चर्ये अयं कायो देहः तदपि मरणापायचकितः तदपि किं निवृत्ता भोगेच्छा वान्यत् पुरुषबहुमानो विगलितः
सपदि शीघ्रं अन्यच्च समानाः समानवयसः सुहृदोपि मित्राणि स्वर्याताः सुरलोकं प्राप्ताः किंभूताः सुहृदः जीवितसमाः प्रा
णतुल्याः सपदि वृद्धत्वे यष्ट्युत्थानं अर्थादुपवेशनं च शनैः अन्यत् च नयने घनतिमिररुद्धे जाते तथापि अयं कायो मरणाद्बिभेति मर
णे छिन्नीत्यर्थः । किंभूतः कायः धृष्टो निर्लज्जः १४ हिंसेति । व्यालानां सर्पाणां धात्रा विधात्रा अशनं भोजनं मरुत्पवनः कल्पि

निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः । श
नैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने अहो धृष्टः कायस्तदपि मरणापायचकितः ॥ १४ ॥
हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं व्यालानां पशवस्तृणाङ्कुरभुजः तुष्टाः स्थलीशा
यिनः ॥ संसारार्णवलंघनक्षमधियां वृत्तिः कृता सा नृणां तामन्वेषयतां प्रयान्ति सततं सर्वे समा

तं किं अयत्नात् हिंसाशून्यं हिंसारहितं पुनः किं अयत्नेन अयत्नलभ्यं सुलभं तथा पशवः तृणाङ्कुरभुजः बालतृणपल्लवभो
जनेन तुष्टाः पालिताः पुनः किंभूताः स्थलीशायिनः भूमौ नृणां मनुष्याणां वृत्तिः साक्षाद्विधिना सृष्टा कृता तां वृत्तिमन्वे
षयतां सततं निरंतरं सर्वे गुणाः समाप्तिं यान्ति किंभूतानां संसारार्णवलंघनक्षमधियां १५ १५ ८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वयंकेवलंमातुर्यौवनवनच्छेदेकुठाराजाताःस्मः।कथंभूताः।ईश्वरस्यपदंनध्यातं।किमर्थंसंसारविच्छित्तयेअस्माभिर्ध
र्मोपिनोपार्जितः।तथाच।नारीपीनपयोधरोरुयुगलंस्वप्नेपिनालिंगितं।अतःकारणात्मातुर्यौवनवनच्छे
दकुठाराएव॥१६॥भोगाइति।अस्माभिर्भोगानभुक्ताः।अस्माभिःतपोनतप्तंवयमेवतप्ताः।नारकीकेःसे

नध्यातंपदमीश्वरस्यविधिवत्संसारविच्छित्तयेस्वर्गद्वारकपाटपाटनपटुर्धर्मोपिनोपार्जि
तः॥नारीपीनपयोधरोरुयुगलंस्वप्नेपिनालिंगितंमातुःकेवलमेवयौवनवनच्छेदेकुठारावयं
॥१६॥भोगानभुक्तावयमेवभुक्तास्तपोनतप्तंवयमेवतप्ताः॥कालोनयातोवयमेवयातास्तृ
ष्णानजीर्णावयमेवजीर्णाः॥१७॥क्षान्तंनक्षमयागृहोचितसुखंत्यक्तंनसंतोषतःसोढादुःसहशीत
वाततपनक्लेशानतप्तंतपः॥

तापिताःकालोनयातःवयमेवयाताइत्यन्वयःतृष्णाकदाचिदपिनजीर्णा
वयमेवजीर्णा १७ आत्मनोनिराशयपदमाह।क्षान्तमिति।अस्माभिस्तदेवयत्नेनकर्मकृतं।नैतैःफलैर्निर्वि
वंविनास्म।यद्यस्मात्कारणात्क्षमयानक्षान्तं।अन्यच्चगृहोचितंसुखंनत्यक्तं।कस्मात्संतोषतः।तथादुःस

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हसीतवान तपनननसो त्वा। तपोन तप्तं। अन्यं त्क्लेशाद्य अहर्निशं नियमतो निश्वसतः प्राणोऽपि तं ध्यातं। अत
एव प्राणिभिस्तत्कर्म कृतं। येन कर्मणा तैः फलैर्वंचितं॥ १८ ॥ वलिभिरिति। मुखं वलिराक्रान्तं पलितैः शि
रअंकितं। गात्राणि शिथिलायन्ते। शिथिलानि भवंति एकातृष्णा सदा तरुणायते॥ १९ ॥ अनित्यमा

ध्यातं वित्तमहर्निशं नियमतः प्राणो न संभोः पदं तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फ
लैर्वंचिताः॥ १८ ॥ वलिभिर्मुखमाक्रान्तं पलितैरंकितं शिरः॥ गात्राणि शिथिलायंते तृ
ष्णैका तरुणायते॥ १९ ॥ येनैवांबरखंडेन संवीतो निशि चंद्रमाः॥ तेनैव च दिवा भानु
रहो दुर्गत्यमेतयोः॥ २० ॥

हा निशि रात्रौ येनैवांबरखंडेन चंद्रमा संवीतो गतः वान्यते नैवांबरखंडेन दिवा वासरे भानुः संवीतः गतः। गुरुः
अहह इति दुःखेनएनयोः सूर्यचन्द्रमसोर्दौर्गत्यं दुःखत्वं विलोक्यताम्॥ २० ॥ ॥ ॥ ५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयविरक्ततामाह। एते विषया अंगभोगलक्षणा अवश्यं यातारः निश्चितं गमिष्यंति। किं कृत्वा चिरतरं चिरका
लं उषित्वापि स्थित्वापि जनो लोको यदमून् विषयान् स्वयं न त्यजति तर्हि वियोगे न को भेदः। किमाधिक्यं। एते विषया
स्वातंत्र्यात् व्रजंतो गच्छंतो मनसः आत्मनोऽतुलपरितापाय भवंति अवलं दुःखाय स्युः। हि निश्चितं एते स्वयं त्यक्ताः
संतः अनंतं शमसुखं विदधति। अतः कारणात् एते विषयाः स्वयं त्यक्ता मोक्षोत्पादका इत्यर्थः ॥ २१ ॥ तृष्णाधि

अवश्यं यातारश्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यजति न जनो यत्स्वयममून्
व्रजंतः स्वातंत्र्यादतुलपरितापाय मनसः स्वयं त्यक्ता ह्येते शमसुखमनंतं विदधति २१
विवेकव्याकोशे विकशति शमे शाम्यति तृषा परिष्वंगे तुंगे प्रसरति तरां सा परिणतिः।

कारमाह। विवेके शनैःशनैः उपशमे सति। शाम्यति उपशमं गच्छति। कुः सति। विवेकव्याकोशे विकाशे विदधा
ति सति। सा परिणतिः तृष्णापरिणामः तुंगे परिष्वंगे आश्लेषे सति नितरां प्रसरति। युक्तोयमर्थः अपरोपि पा
विता विनाभवति सा तुंगे परिष्वंगे सति नितरां प्रसरति न तु आशिंभगेन लब्धावकाशकत्वात् तथा स्यात् तृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ
६

महतां देवानामप्यधिपतिरिंद्रः तस्यां तल्पां दशपात्रं भवति तुंगे परिसंगे मति केन मनसा को भवतीत्यर्थः। मनआ
नां का कथा। किं महद्धिपतिः जराजीर्णैश्वर्यग्रसनसमं गहनाक्षेपकृपणाः जरसा जीर्णं ऐश्वर्यं तस्य ग्रस
नेन यत्समर्थं गहनं तस्याक्षेपेण कृपणाः विध्वंसे समर्थः अतः कारणात् तल्पाग
रीयसी॥ २२ ॥मदनो विडंबनामाह। कृश इति। श्वा कुक्कुरः शुनीमन्वेति। किंभूतः। कृशो दुर्बलः काणः एक

जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपणाः कृपापात्रं यस्यां भवति महतामप्यधिपतिः २२
कृशः काणः खंजः श्रवणरहितः पुच्छविकलो व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः॥
क्षुधाक्षामो जीर्णः पिठरककपालार्पितगलः शुनीमन्वेति श्वा हतमपि च हन्त्येव मदनः॥ २३॥

दृक् खंजो भग्नपादः श्रवणरहितः छिन्नकर्णः पुच्छविकलो लांगूलरहितः व्रणी पिटकव्याप्तः पूतिक्लिन्नः
पर्यंचितः पुनः किंभूतः कृमिकुलशतैरावृततनुः पुनः क्षुधाक्षामः पुनः जीर्णो रजसाक्रांतः पुनः श्वा
पिठरजकपालार्पितगलः कांडमंडसमर्पितमुखः एवंविधं भूतः काम्योपि श्वा शुनीमन्वेति। तदपि म

उरु:
६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयानधिकारमाह॥ तानधिकृत्यैव विषयांस्तथापि न परित्यजंति। कष्टं कममी पंनसुंबति। तथापि किंभिक्षा
शनं तदपि नीरसं रसराहितं तदप्यशनमेकवारं च भूः शय्या अन्यश्च परिजनो निजदेहमात्रं। वस्त्रं च जीर्णशत
खंडमयी कथा। तथापि विषयातुराशया विषयोपमोयांति प्राणिनां॥ २४ ॥ रूपतिरस्कारमाह। अहो र

भिक्षाशनं तदपि नीरसमेकवारं शय्या च भूः परिजनो निजदेहमात्रं॥ वस्त्रं च जीर्णशतखं
डमयी च कंथा हा हा तथापि विषयान्न परित्यजंति॥ २४ ॥ स्तनौ मांसग्रंथी कनककल
शावित्युपमितौ मुखं श्लेष्मागारं तदपि च शशांकेन तुलितं॥ स्रवन्मूत्रक्लिन्नं करिवर
करस्पर्द्धि जघनं अहो निंद्यं रूपं कविजनविशेषैर्गुरुकृतं॥ २५ ॥

नितुःखेरूपं निंद्यं कविजनविशेषैर्गुरुकृतं कथं निंद्यं स्तनौ मांसग्रंथी परि इत्युपमितौ उपमानिमौ। इति किं।
कनककलशौ तदपि वा मुखं श्लेष्मागारं तदपि वशशांकेन तुलितं वदनमसाम्यमानं कृतं जघनं स्रवन्मू
त्रक्लिन्नं तथापि करिवरस्पर्द्धि गजेंद्रशुंडादंडेन स्पर्द्धा कृतं स्पर्द्धीकारकं स्वरूपम्॥ निंद्यपरं तु कविना व्यो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ
७

अहहेति खेदे। मोहमहिमा गहनो वर्त्तते। अजानन् शलभः पतंगः दीपशिखायां पतति। शलभः किं जानन् माहात्म्यं
अजानन्। स मीनो मत्स्यः अज्ञाद् बडिशयुतं। पिशितं मांसं अश्नाति भक्षयति। इहास्मिन्संसारे। एते वयं वि
जानंतोऽपि कामान्न मुंचामः कामान् विपज्जालजटिलान्। विपदां जालो विपज्जालस्तेन जटिलाः विपज्जालजटि ४
लास्तान्। अत एव मोहमहिमा गहनः। २६ अथ दुर्जनमाहात्म्यमाह। विश्रामितो वयं दुर्जनानां पिशुनानां

अजानन्माहात्म्यं पतति शलभस्तीव्रदहने स मीनोऽप्यज्ञानाद्बडिशयुतमश्नाति पिशितम्॥
विजानंतोऽप्येते वयमिह विपज्जालजटिलान्न मुंचामः कामानहह गहनो मोहमहिमा
॥१९॥ विश्रममहमत नायशस्तानुपानायत्तो वंशासनमश्वानि पृष्ठे वासमी वल्कले वा॥

अविनयं अनुमंतुं अंगीकर्त्तुं नोत्सहे। नोत्साहं कुर्महे। किं दुर्जनानां। नवधनमधुपानभ्रांतसर्वेंद्रियाणां
नवं नवीनार्जितं धनं नवधनं मदे वन मधुपानं मदिरापानं तेन मधुपानेन भ्रांतं सर्वेंद्रियाणि येषां तेषां
वचनाः अलमत्यर्थं अशनाय भोजनाय शिशनमलिनं दृशान्यत्वा दुआनायनो पंसामादवनिपदृष्टेषामनो।

नवधनमधुपानभ्रांतसर्वेंद्रियाणामविनयमनुमंतुं नोत्सहे दुर्जनानां॥ २०॥ ४

गुरुः
७

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातिनामुद्दिश्य माहात्म्यं सांप्रतं बाणानां कमनीयमदज्वरः कमला। कतिपयपुरःस्थाम्येसति। कतिपयपञ्चराशीशोमति
धन्यैः केश्चित्पुरा पूर्वं जगन्नालिनं जगनस्नष्टं किं धन्यैः विपुलहृदयैर्दृष्टैर्मोभिः अपरैः केश्चिद्दपि विधृतं निज
भुजाभ्यां धारितं अन्यैः कश्चिदपि भुजगेश्वराभ्यदर्ज्जं। केऽप्यकालावेति जित्वा येषां शावद्दाक्षार्थवर्तते। जगन्त्सर्मेव तृ
णमिव प्रपातत्तामनना पारशेन दीपतेन तथा जगाठजित्यदत्त इति निश्चितं। इतास्मिन्नीवलोके अन्येधीराश्चतुर्द्दश

विपुलहृदयैरन्यैः केश्चिज्जगज्जनितं पुरा। विधृतमपरैर्दत्तं वाप्येविजित्य तृणं यथा॥ इह हि
भुवनान्यन्ये धाराश्चतुर्दश भुञ्जते कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः २८ त्वं राजावतंस
पुपासितगुरुः प्रज्ञाभिमानोन्नताः ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः॥ इत्थं मा
नदनातिदूरमुभयोरप्यावयोरं तरं यद्यस्मासु पराङ्मुखोसि वयमप्येकान्ततो निस्पृहाः॥ २९ ॥

भवानिमं जनं तेन तथा सत्यस्वामित्वेको मदवेगः॥ २८॥ निस्पृहाणामधिकारमाह। हे नरेंद्र त्वं राजावतंसो। वयमपि पुपा
सितगुरुः प्रज्ञाभिमानोन्नता धन्या महा। हे राजेन्द्र त्वं विभवैः ख्यातः। नोस्माकं यशांसि महत्तानि कवयः कवीश्वराः
क्षुप्रतन्वंति दशस्वपि दिशासु विस्तारयंति। हे मानद। मामेयती तिमानदः खण्डने धातस्तो हे मानखण्डन राज को

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऽप्यं तं नातिदूरं हे राजेन्द्र यदि वेत्तं अस्मासु पराङ्मुखोसि अनादरोसि तत तादृशमपि एकांतो निस्पृहाः वयं गेहात्वं पुनाद
रात्त्वयि विषये अनादराः ॥ २९ ॥ राज्ञां सर्वतिरस्कारमाह । जडामूर्खा विषादे कर्तव्यव्रतते सन्मुखं कुर्दा विदधाति क
थं क्षितिभुजां राज्ञां तस्या भुवो लाभो पृथिव्या लाभे क इव वर्द्धमानः यस्यां पृथिव्यां अभुक्तापां समांन्तपश्यते
नरेन्द्र महद्भिः क्षणमपि न मानं न गतं तदंशस्या पृथिव्या विभागस्यांशविभागेनु तद्वयवलेशान स्यापि

अभुक्ता यापस्यां क्षणमपि न मानं नृपशतैर्भुवस्तस्या लाभे क इव बहुमानः क्षितिभुजां ॥ तदं
शस्याप्यंशेन दवयवलेशेपि पतयो विषादे कर्तव्ये विदधानि जडाः प्रमुतमुदा ॥ ३० ॥ मृत्पिंडो
जलरेखया वलयितः सर्वोप्ययं नन्वणुः स्वीकृत्यमपि एवं संयुगशतैः राज्ञां गणैर्भुज्यते ॥ ते दद्युर्द
दतेथवा न किमपि क्षुद्रा दरिद्रा भृशं धिक् धिक् तान्पुरुषाधमान् धनकणान्वांछंति तेभ्योपि ये ३१

लेशोपि पतयः स्वामिनः ३० नन्वणुमहत्वापमानाधिकधिक् पौरुषात् तेभ्योपि धनकणान् वांछंति कथमयं मृत्पिंडः पृ
थ्वीवलयः सर्वोपि जलरेखया वलयितः सनेननु अणुः स्वल्पप्रमाणः पुनः स एवं मृत्पिंडो राज्ञां गणैर्भुज्यते
किं कृत्वा संयुगशतैः संग्रामशतैर्मरणशतैः स्वीकृत्यांगीकृत्य ते क्षुद्राः दरिद्राः राजानो भृशमत्यर्थं किमपि न
दद्युः अथवा न ददते तानेव पुरुषाधमान्धिक् ये तेभ्योपि धनं वांछंति ३१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उभगमेवकल्लतान्समाहात्मामेनितांतो यने· नृपसत्तमनिवयंके· वयंनटान· विटान· उन्नात्तनिणायनाचरद्रोहनि
वद्धाबुद्धयो येषांतेपरद्रोहा· वयंयोषितापिन· कियोषितः कुचभारेणआसमंताद्भारेणानमिताः कस्मै
वंविधोअपिवयंनमेवसंनृपसत्तमनिकेनामनतके पिइत्यर्थः ३२ पुरापूर्वंउपशमवतांविद्वत्ताप्र

ननटानविटानगायनानपरद्रोहविबद्धबुद्धयः ॥ नृपसद्मनिनामकेवयंकुच
भारेणनमितानयोषितः ॥ ३२ ॥ पुराविद्वत्तासीदुपशमवतांक्लेशहतयेगता
कालेनासौविषयसुखसिद्ध्यैविषयिणां ॥ इदानींतुप्रेक्ष्यक्षितितलभुजंशास्त्र
विमुखानहोकष्टंसापिप्रतिदिनमधोधः प्रविशति ३३

तिदिनवैउपशंक्लेशहत

येसंसारनिवारणाय आसीत्। असौविद्वत्ताकालेनगच्छताविषयिणांविषयसुखसिद्ध्यैगता। अहोइतिखेदे वैश ९
कष्टंवितोधयति· इदानींसापिविद्वत्ताप्रतिदिनमधोधः प्रविशति किंकृत्वा· शास्त्रविमुखान्क्षितितलभुजाः प्रे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ:

ताहंकारश्चकृषप्रदिक्षपाहामहतिआत्मनः मनको पि कुहकः आसीत्। यस्य कुकपस्य कपालमुच्चैर्यथा भवति।
मदनजा पितामहशस्य मूर्ध्नि निहते अलंकारविधये विनिहितः। किं कपालधरं उज्वलं अधुना इदानीं
केश्चिन्नमद्भिर्नृभिः पुंसां कुरुषाणां कोयं अतुलदर्पज्वरभरः। किं नृभिः प्राणत्राणप्रणतिमतिभिः प्रा
णत्राणप्रणतामति· तत्र प्रवणा मतिर्येषां ते प्राणत्राणाः तैः २४ अर्थानामिति। हे राजन् त्वं अर्थानामीशिष
सजानः कोप्यासीत् मदनजित् मोमूर्ध्नि बलं कपालं यस्योच्चैर्विनिहितमलंकारविषये नृभिः प्रा
णत्राणप्रवणमतिभिः केश्चिदधुना नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः॥ ३४॥ अर्थाना
मीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं शूरस्त्वं वादिदर्पज्वरशमनविधावक्षयं पाटवं नः
सेवन्ते त्वां धनान्धा मतिमलहतये मामपि श्रोतुकामा मय्यप्यास्था न चेत्तत्त्वयि मम सुतरामेष राज
न्नासीवर्तते। वान्यदपि गिरां वाचां नामीश्महे। स्वामिनो वर्तामहे। वान्यत् यावदित्यं अमुना प्रकारेण त्वं
शूरोनोस्माकं वादिदर्पज्वरशमनावबोधे अक्षयं निश्चयं पाटवं वर्तते। हे राजन् त्वां धनान्धाः सेवन्ते। मामपि श्रो
तुकामाः श्रोतारः सेवन्ते किमर्थं मतिमलहतये· शुद्धिकालुष्यस्य एनापाहं राजन् ममापि त्वयि विषयेऽन्त

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

णास्थानां रक्षणं सुष्टुतराम् अतिशयेनास्मां प्रतिगतोस्मि प्राप्तोस्मि। एतावता तव मम नापि किमप्यंतरं नास्ति॥ ३५ ॥
आत्मनो गुणां विवेचनमाह। यदा यस्मिन् प्रस्तावे अहं किंचिज्ज्ञः किंचिन्न जानातीति। किंचिज्ज्ञः आसंपन्नदोर्वित्व
संबंधः तदा तस्मिन् प्रस्तावे मदांधः समभवं करी गज इव। अधुना सर्वज्ञोस्मीति कारणात् मम मन अव
लिप्तं कस्मात् रहितमभवत्। यदा यस्मिन् प्रस्तावे बुधजनसकाशात् पंडितवर्गसमीपात्। किंचित् २ अवगते

यदा किंचिज्ज्ञोहं गज इव मदांधः समभवं तदा सर्वज्ञोस्मीत्यभवदवलिप्तं मम मनः॥ यदा किं
चित् किंचित् बुधजनसकाशादवगतं तदा मूर्खोस्मीति ज्वर इव मदो मे व्यपगतः॥ ३६ ॥
अतिक्रांतो कालो ललितललनाभोगसुभगो भ्रमंतः श्रांताः स्मः सुचिरमिह संसारसरणौ।

ज्ञानं तत्राद्य इति अनेन प्रकारेण मे मदो व्यपगतो दूरीकृतः। इतीति किं। अहं मूर्खोस्मि मदज्वर इव यथा क
स्यापि ज्वरो याति तथा मम अहंकारो मे गतः॥ ३६ ॥ निर्मलत्वं रूपमाह। अतिक्रांत इति। हे बाले ललितललना
भोगसुभगः कालः अतिक्रांतो अतिक्रामः। संपूर्णीकृतः ललिता लावण्यापाः ललनाभोगसुभगः इहास्मि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ मर्त्यलोके संसार सरागिषु विरमं मंतः ओं नास्म। इदानीं त्वत्सिंधोः गंगाया मम भुविकस्यां स्थली धुशिव शिव शि
१० वेति प्रतनुमः विस्तारस्यामसं किं वयं कुमारैः पूत्कारैः समाक्रंदन गिरः नालेनं कायिनव संमुखं नैव लोक
यामः ३७ सुधियां केवलं पुरुषाणां मेतदेव कुत्यं यज्जह्नुकन्या पयः पूतया वगिरींद्र कंदर दरीकुंजे निवा
सः क्वचित् कोऽर्थः जह्नुकन्यायाः गंगायाः पयोभिः पूतया वक्ष्यापि याषाणया वा शान्ते वा यो सो गिरींद्र

इदानीं त्वत्सिंधोस्तव भुविसमाक्रंदनगिरः मुक्ताः पूत्कारैः शिव शिव शिवेति प्रतनुमः ३७
मा नेत्या वितिस्त्वं देवत सुनिःपर्यप्रयाते भिनिक्षीराणां वंधुजने गते याजनेनवे शानेर्यो
वने। पुरुष केवलमेतदेव सुधियां यज्जह्नुकन्यापयः पूतत्रावगिरींद्रकंदरदरीकुंजे निवासः क्वचित्

पर्वतस्तस्य पार्श्वस्य विवरस्य दरी गुहा तस्यापि कुंजे। जह्नुः नाम्नी नासेवारं कमति। मा नेत्या वि उत्त
निसति। या नायकस्य निर्वांडिते सातो। यान्यदपि निवायके अर्थ प्रयाने सति वा नः क मति। क्षीराणे बंधुजने १०
साताजनः क्षमति या रुजने गते मति जनः क मतिसंशानैः शानैः यो वनेन वे सान्ते तदा वनगाम एव वंर स्रावर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ताइतिरवेदेत्वं हृदयपद्मकथा प्रसादं । किं नेत्रं गृहीत्वं विशालिकयं अवेशां कोपि । किं कृत्वा परेशां वेत्तासि प्रतिदि
वसं आराध्य । किं प्रसादं क्लेशकलितं कलुषकलितं । हे हृदयपद्म त्वयि अंतर्मध्ये प्रसन्नेन । विमुक्तेः मोक्षस्य संक
ल्पं अभिलषितं वांछितं तेन त्वं न प्राप्नोति । त्वयि स्वयं उदित बिंना मति गुरोः किं त्वं विमुक्तेः संकल्पः ॥

परेशां वेत्तासि प्रतिदिवसमनाराध्य पद्मकथं प्रसादं किं नेत्रं विशालि हृदयपद्म क्लेशकलितं
प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगुणो विमुक्तेः संकल्पः किमभिलषितं प्राप्यति न
ते ॥ ३९ ॥ अनावर्त्तीकालो व्रजति स तृथा तत्र गणितं दशास्तास्ता सोढा व्यसनशतसंपा
तविधुराः ॥ कियद्वावक्ष्यामः किमिव वचनानां प्रतुपकृतं स्वयं यावद्वाक्यावयवनिरपितं देवस्थ
वसितं ॥ ४० ॥

॥ ३९ ॥ सकलो व्रजति तत्र गणितं किं अनावर्त्ती अपुनरागामी न पुन
रागमो ऽस्यास्तीति असौ पुनरागामी । इत् अस्माभिस्तास्ता दशाः सोढा ॥ ४० ॥ ❀ ॥ ❀ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थित इति। उपशांतैकमनसां। उपशांतं एकं मनो येषां ते। उपशांतानां वनं वा गृहं वा सदृशं। इत्यमुनाप्रका
रेण इयं सामग्री हरभक्तिं स्पृहयतां भवति। इतीति किं। पुण्ये पवित्रेऽरण्ये स्थितः पुनः हरिणैः हंत इत्यागमे
हरिणैः सहपरिचयः वान्धवत्वे मेध्या वृत्तिः प्राणवृत्तिरित्यर्थः वा स्नाति नदी। नदिं नदिं प्रति दृषदस्त

स्थितः पुण्येऽरण्ये सहपरिचयो हंत हरिणैः फलैर्मेध्या वृत्तिः प्रतिनदि च तल्पानि दृषदः॥ इ
तीयं सामग्री भवति हरभक्तिं स्पृहयतां वनं वा गेहं वा सदृशमुपशांतैकमनसां॥ ४१ ॥
अमीषां प्राणानां तुलितबिसिनीपत्रपयसां कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितं
यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां कृतं वीतव्रीडैर्निजगुणकथापातकमपि॥ ४२

तुलितेत्यादि ४१ अस्माभिरमीषां प्राणानां कृते किं न व्यवसितं उद्यमितं कथंभूतैरस्माभिः विगलितविवे
कैः विगलितः विवेको येषां ते विवेकरहितैः यदाढ्यानामग्रे धनवतां पुरः व्रीडा लज्जा गतलज्जैरस्माभिः नि
निजगुणकथापातकमपि कृतं निजगुणानां कथा पातकं किं आढ्यानां द्रविणमदेन इति संज्ञाः मनसां द्रविण
मदेन निःसंज्ञं मनो येषां आढ्यानां तेषां धनवतां अग्रे॥ ४२ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मै कालाय नमः॥ अहो इत्याश्चर्ये भो भ्रातः महत्कष्टं विलोक्यतां । किं कष्टं स एव महान्नृपतिः सामन्तवर्कं। सामन्तत्
पार्श्वेपि सा राजपरिषत्। सापि राजसभा। ताश्चन्द्रबिम्बाननाः नार्य इत्यर्थः। सामन्तराजपुत्रनिवहः मन्त्रिकुमार
समूहः। किं राजपुत्रनिवहः। उद्रिक्तः सदर्पः। सान्यते बंदिनः भटाः तान्यंताः कथा यस्य वशादेतत्सर्वं पूर्वोक्तं स्मृति
पदगमनात्। कथाशेषं जगाम। कालाय तस्मै नमः यतः यतः कालो नशीयनेन सर्वः ४३ पुनः कालस्य द्विष्णा

भ्रातः कष्टमहो महान्स नृपतिः सामंतवर्कं च तत् पार्श्वे तस्य च सापि राजपरिषत् ताश्चं
द्रविंबाननाः। उद्रिक्तः स च राजपुत्रनिवहस्ते बंदिनस्ताः कथाः सर्वं यस्य वशादगात् स्मृतिपदं
कालाय तस्मै नमः॥ ४२॥ वयं येभ्यो जाताश्चिरगत एव खलु ते समं यैः संवृद्धाः स्मरपदवीं
ते पि गमिताः॥ इदानीमेते स्मः प्रतिदिवसमासन्नपतना कुतोस्तुल्यावस्थां सिकतिलनदीतीरत

रुः॥ वयमिति। ते येभ्यो समानवयेभ्यो समं जाता। खलु निश्चितं ते चिरपरिगताः एव मृता एव। वयं यैः सह संवृद्धास्ते पि
स्मृतिविषयतां गमिताः स्म ते विषयता स्मृतिविषयतां स्मारिताः सन्तः शेषतां गोचरमात्रीभूता इत्यर्थः। इदानीमे
ते वयं स्मः सा वयोवस्था। किं यथा सिकतिला वालुकाधिका नदी नदीतीरतरुभिः तुल्यावस्थां वयं प्राप्ताः स्मः यस्मात्सिकति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लावालुकादिकानदीसिकनिलनदीतस्यास्तीरेतरवः। सपतनशीला भवन्तीत्यर्थः। सुकुमारभूमित्वात्। या
दृशास्तरवस्तादृशावस्थां प्राप्ताः स्मः कस्मात्प्रतिदिवसं दिवसं प्रति आसन्नपतनत्वात्। आसन्नकालम
रणात्। एतावता संसारस्यादृशी वर्तते॥ ४४ ॥ कालो मृत्युः काल्या सह कालरात्र्या सह प्राणिसारै
सारिकाक्षनुकैः क्रीडति मन्ये। किं कार्कः वक्रीकलापस्यासौ वऊकलः किं कुर्वन् इमौ द्वौ रजनिदि

मत्रानेकाः क्वचिदपि गृहे तत्र तिष्ठत्यथैको यत्राप्येकस्तदनु बहवस्तत्र वान्ते न चैकः॥
इत्थं चेमौ रजनिदिवसौ दोलयन्द्वाविवाक्षौ कालः काल्या सह वऊकलः क्रीडति प्राणिसारैः

वसौ इत्थमनेन प्रकारेण। अक्षाविव पाशकाविव दोलयन् प्रक्षिपन्। इत्यर्थः। अन्योपि यो धूर्तः क्री
डां कुरुते तस्यासौ पाशकौ विलोक्यते अत्र कालः धूर्तः। रजनिदिवसौ पाशकौ इत्थं कथं यत्रक्वाचिद
गृहे अनेकाः तत्र एकस्तिष्ठति अपि पुनः यत्रैकस्तत्र बहवः वा यत्र बहवस्तत्रैकोपि न। कालं क्रीडा

वैराग्यशतकटी ४ पुः १२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनकोकेनविद्मः वयंकिंकुर्मःकिमितिसंशये।सुरनदीगंगां।निवसामः।आश्रमंकुर्मः।किंवयंतपस्यं
तःसंतःतपःकुर्वंतिसंति।उतअथवादारान्कलत्राणिपरिचरामःपरिचर्यांकुर्मः।किंदारान्गुणो
दारान्गुणोत्कृष्टान्।उतअथवाशास्त्रौघान्पिबामः॥श्रवणः।किंशास्त्रौघान्उतविविधकाव्या

तपस्यंतःसंतःकिमपिनिवसामःसुरनदींगुणोदारान्दारानुतपरिचरामःसविनयं
पिबामःशास्त्रौघानुतविविधकाव्यामृतरसान्नविद्मःकिंकुर्मःकतिपयनिमेषायुषिज
ने॥४६॥

मृतरसान्उतःविविधकाव्यानाममृतरसोयेषांतान्उतविज्ञानवयंनविद्मः।वेनस्यास्मकंसंश
योवरिवर्ति।एतेषुपदार्थेषुकिंकुर्मः।योगुणाधिकस्तंसेवयामः॥ ४६ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDE, Delhi

भर्तृ॰ किमिति संभावनायां मम तैः सुदिवसैर्भाव्यं यत्र दिवसेषु जरठहरिणाः प्रौढमृगा निर्विशंकाः
१३ सन्तः शृंगकण्डूविनोदं शृंगघर्षणलीलाः संप्राप्स्यंते। कथंभूतस्य मम हिमगिरिशिलाबद्धप

गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य ब्रह्मध्यानाभ्यसनरभसा योग
निद्रां गतस्य ॥ किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशंकाः प्राप्स्यंते जरठ
हरिणाः शृंगकंडूविनोदम् ॥ ४७ ॥

आसनस्य हिमगिरिशिलायां बद्धपद्मासनं येन तस्य। गंगातीरे मम योगनिद्रां गतस्य ब्रह्मध्या गुरुः
नाभ्यसनविधिना ब्रह्मध्यानस्याभ्यसनं तस्य विधिः ब्रह्मध्यानाभ्यसनविधिः एवंविधेन निर्मलभावे १३
न मम कदा भाव्यमिति ॥ ४१ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहं शिव शिव शिवेत्यार्तवचसा क स्यां ।। किं अहं भवाभोगोद्विग्नः भवस्य संसारस्याभोगस्तेनोद्विग्नः। किं
भूतेन वचसा। आनंदोद्गतबहुलबाष्पप्लुतदृशा। आनंदेनोद्गतानि बहुलानि यानि बाष्पाणि तैः

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने सुखासीनः शांतध्वनिषु रजनीषु
द्युसरितः।। भवाभोगोद्विग्नः शिव शिव शिवेत्यार्तवचसा कदा स्यामानंदोद्ग
तबाष्पप्लुतदृशा ।। ४२ ।।

प्लुतेक्षणे दृशौ यस्य सः। आनंदादेन्ना किंभूतो हं द्युसरितो गंगायाः क्वापि निर्जन पुलिने सुखा
सीनः क्वासु रजनीषु किं रजनीषु शांतध्वनिषु। रहितशब्दासु। एवंविधा वासरा भाग्यहीनानां न
भवेयुः ।। ४२ ।।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवो महादेवो नान्यः सरिदपि न या पि सैवामरसरित् गंगा आगारं गृहं गुहा एवा वसनमपि वस्त्रमपि ता एव हरि
तो दिशः वा अथवा सुहृन्मित्रमयं कालः इदमदैन्यं व्रतं इयं कियद्वक्ष्यामः दयिता कलत्रं न वटविटप एवा
स्तु॥ ५० ॥ शर्वं शिरः महेशशिरः स्वर्गादधो वर्त्तते। पशुपतीशिरस्तः महेश्वरमस्तकात् क्षितिधरं

महादेवो देवः सरिदपि च सैषा सुरसरित् गुहा एवागारं वसनमपि ता एव हरितः॥ सुहृ
द्वा कालोयं व्रतमिदमदैन्यं व्रतमिदं कियद्वा वक्ष्यामो वटविटप एवास्तु दयिता॥ ५०॥
शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं गिरीन्द्राद् उत्तुंगादवनिमवनेश्चापि जलधिं
अधो गंगा सेयं पदमुपगता स्तोकमथवा विवेकभ्रष्टानां भवति विनिपातः शतमुखः ५१

उत्तुंगाद् गिरीन्द्राद् अवनिम् अयो जानीहि अवनेश्चापि सो जलधिं सम्र जानीहि। स्तोकं गांगेयं पदं अधो नन प
गतं॥ अथवा विवेकभ्रष्टानां प्राणिनां विनिपातः शतमुखो भवति॥ ५१ ॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नामेति संबोधने। आसा नाम नदी वर्त्तते ऽस्ति। किं आसा नाम नदी। मनोरथा एव जलानि यस्यां ताः
पुनः किं आसा नदी। तृष्णा तरंगाकुला। अन्यापि या नदी भवति सा तरंगाकुला। पुनः किं आसा नदी
रागग्राहवती। रागा एव ग्राहाः। अन्यापि नदी ग्राहजलचरजीववती भवति। पुनः किं आसा न
दी वितर्कविहगा। वितर्का विचाराः त एव विहगाः पक्षिणो यस्यां सा। नद्यामपि विहगा भवंति। पुनः

आसा नाम नदी मनोरथजला तृष्णा तरंगाकुला रागग्राहवती वितर्कविहगा धैर्यद्रुम
ध्वंसिनी। मोहावर्त्तसुदुस्तरातिगहना प्रोत्तुंगचिंतातटी यस्याः पारगता विशुद्धमन
नसो नंदंति योगीश्वराः ५१

किं आसा नदी। धैर्यद्रुमस्य ध्वंसो ऽस्या अस्तीति। धैर्यं अन्यापि नदी द्रुमध्वंसिनी भवति। पुनः किं मो
हावर्त्तसुदुस्तरा। मोहस्यावर्त्तो मोहावर्त्तस्तेन सुदुस्तराः अन्यापि नदी सुदुस्तरा भवति। पुनः किं आः अति
गहना। अतीव गहनं यस्याः सा। अन्यापि नदी अतिगहना भवति। पुनः किं आसा प्रोत्तुंगचिंतातटी। प्रोत्तुं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDE- Delhi

गविंता एव नदी यस्यां सा· अन्यापि नदी अतिगहना भवति। तानौ प्राप्यते। तस्या नद्याः पारंगता योगी
श्वरानंदनु। सर्वेत्कर्षेण वर्तन्ता। योगीश्वराः किंभूता। विमृष्ट मनसो निर्मलमनसः॥ ५२ ॥ हे तात मा
दृक् कोपि पुमान् अस्माकं नयनं पदवी नेत्रगोचरे वा। श्रोत्रवर्त्म श्रोत्रमार्गेनागतः यो पंजीवस्यांतः

आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृक् नैवास्माकं नयनपदवीं श्रोत्र
वर्त्मागतो वा॥ योयं धत्ते विषयकरिणीगाढरूढाभिमानः क्षीवस्यांतःकर
णकरिणः संयमालानलीलाम्॥ ५३ ॥

करणकरिणः संयमालानलीलां धत्ते। किंभूतो यं विषयकरिणीगाढरूढाभिमानः विषय एव क उह:
रिणी हस्तिनी तस्यां गाढः रूढोऽत्यंतमारूढो अभिमानो यस्य। किंलक्षणानामस्माकं। आसंसा १५
रं मा वादिदं त्रिभुवनं चिन्वतां बहु येतां। यमाद्या जितेंद्रियः॥ ५३ ॥ । ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहं तेषां वासराणां मंतः स्फुरति हसितं आनन्दे देस्मरे यं चिंतयामि। स्वे वासरा धनपति पुरे धना
म्नाना पुरस्तात्प्रार्थनादुःखदीर्घा वर्द्धते। प्रार्थनादुःखेन दीर्घाः प्रार्थना याचना वासरा विषयाक्षे

ये वर्द्धन्ते धनपतिपुरः प्रार्थनादुःखभाजो येवाल्पत्वं दधति विषया
क्षेपपर्यन्तवृद्धेः॥ तेषां मंतस्फुरति हसितं वासराणां स्मरे यं ध्या
नच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः॥ ५४ ॥ ॥

पे पर्यन्तावृद्धिः। विषयाक्षेपः तस्य किंभूतोयं शिखरिकुहरग्रावशय्यानिषण्णः। शिखरिणा कु
हरः पर्वतविवरस्य ग्रावशय्यातत्र निषण्णः निविष्टः॥ ५४ ॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ सांप्रतं निर्वेदनायाः स्वरूपमाह। अहो ऽयं कालो ऽस्माभिः परपिंडलोलुपतया काकैरिव प्रेरितः। प
१९ रपिंडस्य ग्रासस्य लोलुपतानया। कथमस्माभिर्विद्या नाधिगता न पठिता। किंभूता विद्याः कलंकरहि
ता पापरहिता दूरमर्थः। वान्याद्वित्तेनोपार्जितं अपि पुनः समाहितेन मनसा निश्चलचित्तेन पित्रो

विद्या नाधिगता कलंकरहिता वित्तं च नोपार्जितं शुश्रूषापि समा
हितेन मनसा पित्रोर्न संपादिता॥ आलोलायतलोचना युवतयः स्वप्ने
पि नालिंगिताः कालोयं परपिंडलोलुपतया काकैरिव प्रेषितः॥ ५५॥

माताजनकयोः शुश्रूषापि नो संपादिता न कृता। वा स्वप्ने पि युवतयो नालिंगिता। किंभूता युवतयः आलो उद्भर्तृ
लायतलोचनाः। आसमंतात् भावेन लोलानि चपलानि आयतानि दीर्घाणि लोचनानि यासां ताः। तस्मा १९
त्कारणात् त्रुथैव जन्म गमितम्॥ ५५॥

CC-0. Digitized by eGangotri and MIDF- Delhi

वयं पुण्ये पवित्रे ऽरण्ये कानने ष्यामः कैः समं परिणतशरच्चंद्रकिरणैः समं परिणताः परिणामं प्राप्ता
ये शरत्कालीनाश्चंद्रकिरणाः परिणतश०न्द्रे ॥ कस्मिन्सति सर्वस्वे सर्वधने वितीर्णे सति॥ किंभूता वयं त
रुणकरुणापूर्णहृदयाः तरुणा करुणा या पूर्णं हृदयं येषां ते॥ तरुणकरुणयां किं कुर्वतः स्म

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः स्मरंतः संसारे विगुणपरिणामावधिग
तीः। वयं पुण्यारण्ये परिणतशरच्चंद्रकिरणास्त्रियामा नेष्यामो हरिचरणचित्तैकशर
णाः ॥५६॥

संसारे विगुणपरिणामावधिगतीः स्मरंतः विगुणा परिणामावधिगतास्ताः
पुनः किंभूता वयं हरिचरणचित्तैकशरणाः हरिचरणयोः चित्तस्य एकं शरणं येषां ते हरिः प्रद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृः हे राजेंद्र इहास्मिन्संसारे वयं वल्कलैः कृत्वा परितुष्टाः। त्वंच लक्ष्म्या परितुष्टाः। एतावता संतो
१७ षस्तत्त्वमेकमेव। इहास्मिन्नर्थे परितोषः सम एव। किं परितोषः निर्विशेष एव अविशेषो

वयमिह परितुष्टा वल्कलैस्त्वंच लक्ष्म्या सम इह परितोषो निर्विशेषो विशेषः
स तु भवतु दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोर्थवान्को दरिद्रः ५१

यस्मान्नूं यस्य स निर्विशेषो विशेषः विशेषश्चायं तु पुनः स दरिद्रो भवतु। यस्य पुरुषस्य विशाला वि भर्तृः
स्तीर्णा तृष्णा। अनंततृष्णाः पुंसो दारिद्र्यं कापि न याति। त्यागेन तु पुनः मनसि परितुष्टे सति। को १७
र्थवान्को दरिद्रः अपि तु कोपि न॥ ५७॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदहं न जाने एषा कस्य उदारस्य तपसः परिणतिः परिणामो वर्तते। एषा का परिणतिः
यदेतत्स्वाछन्दं विहरणं विचरणं· अन्यञ्चाकार्पण्यमशनं प्रबलभोजनं। अन्यञ्च महार्घैः सं

यदेतत्स्वाछंदं विहरणमकार्पण्यमशनं सहार्यैः संवासः श्रुतमुपशमैकव्रत
फलं॥ मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृशन्न जाने कस्यैषा परिणति
रुदारस्य तपसः॥ ५८ ॥

वासः परिकरेण सह निवासः। उपशमैकव्रतफलं उपशमरसोल्लासितं श्रुतं शास्त्रं बहिरपि वा
ह्यप्रदेशेपि मनो मंदस्पंदं कल्पनानां रहितं। अहं कुर्वन्। चिरस्य चिरात्त्राय विमृशन् विमर्शीनां
कुर्वन् चिरकालं चिंतयन्नित्यर्थः॥ ५८ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृः
१८

धन्यास्त एव कर्मनिर्मूलयंति।। के धन्याः संन्यस्तदैन्यव्यतिकरनिकराः संन्यस्तो निराकृतो दैन्यव्यतिकरस्य
निकरो यैस्ते पुनः किंभूतास्ते स्वान्तसंतोषिणो येषां। अन्यच्च येषां पुरुषाणां निःसंगतांगीकरणपरि
णति। निःसंगतायाः अंगीकरणं तस्य परिणतिः निःसंग। येषां पुंसां पात्रभोजनभांडं पाणि

पाणिं पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्यमक्षय्यमन्नं विस्तीर्णं वस्त्रमाशा
दशकमपमलं तल्पमस्वल्पमूर्वी येषां निःसंगितांतःकरणपरिणतिःस्वा
न्तसंतोषिणास्ते धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्मनिर्मूलयंति।। ५८।।

हस्तो पवित्रं भ्रमणपरिगतं भैक्ष्यं अक्षय्यं अन्नं अपमलं वस्त्रं विस्तीर्णं आशादशकं। एतावता दिगंबरं
पुनः अपमलं निर्मलं अखिलं विस्तीर्णं शय्यास्थानं उर्वी पृथिवी एवं विधे रूपेणा ये संसारपारंगच्छंति
त एव धन्याः ५८

गुरुः
१८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हेसखेजगतिरसायांविदुषः परिडतस्यतपसोदन्यन्नश्रेयः। कल्याणंन। कथंस्वामी अधिपतिर्दु
राराध्यः क्षितिभुजो राज्ञानः तुरंगबलविन्नाः तुरंगवद्बलस्येनसा। नृपतेः वयंस्थूलेच्छा·वान्य

दुराराध्यस्वामीतुरगबलविन्नाः क्षितिभुजोवयंतुस्थूलेच्छाम इतिवपदेबद्ध
मननसः॥ जरादेहंमृत्युर्हरतिसकलंजीवितमिदंसखेनान्यच्छ्रेयोजगतिविदु
षोऽन्यत्रतपसः॥ ६०॥

म इतिपदेयुक्तिलक्षणोबद्धमनसः। जरादेहंहरतिमृत्युरिदंसकलंजीवितंहरति ततस्तपसा
विना श्रेयोन॥ ६०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ हे बुधाः पंडिता योगे मनोवचनकायसंरोधनलक्षणे बुद्धिं विदध्वं। इतरत् विलंबनं तृष्णाप्रायं कथं
१९ भोगा मेघवितानमध्यविलसत्सौदामिनीचंचलाः कोर्थः। मेघवितानमध्ये विलसंती या सौदामिनी
विद्युत्तद्वच्चंचलाश्चपलाः आयुश्च जीवितं वायुविघट्टिताभ्रपटलीलीनांबुवद्भंगुरं। वायुनावि

भोगा मेघवितानमध्यविलसत्सौदामिनीचंचलाः आयुर्वायुविघट्टिताभ्रपट
लीलीनांबुवद्भंगुरं। लोला यौवनलालसा तनुभृतामित्याकलय्य द्रुतं योगे धै
र्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः॥ ६१ ॥

घट्टिता या अभ्रपटली तत्र लीनपदं पानीयं तद्वद्भंगुरं विनाशशीलं तनुभृतां प्राणिनां यौवन वृहः
लालसा। यौवने या लालसा। लोला अचंचला वर्तते इति आकलय्य ज्ञात्वा धैर्यं तत्पदं शीघ्रं योगे: १२
मनोविरुद्धं हि योगे धैर्यसमाधिसिद्धिसुलभे ६१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राप्ते इति। मानी ज्ञानी अभिमानी नरः क्षुधार्तः सधन्यः स्कुम्भं उदरदरीपूरणाय द्वारं द्वारं प्रवृत्तो वरं किं
कृत्वा। महति ग्रामे वा अथवा वने कपाली कर्परी मांसायन्नहीना किं कपाली मितपटेन येन वक्ते

प्राप्ये ग्रामे वने वा महति मितपटच्छन्नपाली कपाली मासायन्न्यायगर्भद्विजहुत
हुतभुग्धूमधूम्रोपकण्ठे। द्वारं द्वारं प्रवृत्तो वरमुदरदरीपूरणाय क्षुधार्तो
मानी ज्ञानी सधन्यो न पुनरनुदिनं तुल्यकुल्येषु दीनः॥ ६२ ॥ ॥

गाच्छन्ना आच्छादिता कपाली यस्याः सा या किं ग्रामे वा वने प्राप्ते पवित्रे किंभूते द्वारं न्यायगर्भद्वि
जहुतहुतभुग्धूमधूम्रोपकण्ठे न्यायगर्भेण न्यायशास्त्रपठितेन द्विजेन हुतो यो सौ हुतभुक् वैश्वा
नरः तस्य यो सौ धूमः प्रधूम्रो भवति लेन व्याप्तं उपकण्ठं यस्य तत् न्यायगर्भे॥ ६२ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ भत्तस्त्वयोगिनो ये पथिमार्गे जनैः संभाष्यमाणा नक्रुद्धा यांति सौम्यतुष्टमनसो यांति। किं जनैः
२० उत्पन्नेन प्रकारेण विकल्पजल्पमुखरैः॥ इतीति किं। अथवा द्विजो ब्राह्मणः अथवा शूद्रः अथवा

चंडालः किमयं द्विजातिरथवा शूद्रोथ किंतापसः किंवा तत्वनिवेशयेशल
मतिर्योगीश्वरः कोपि किं॥ इत्युत्पन्नविकल्पजल्पमुखरैः संभाष्यमाणा
जनैर्नक्रुद्धाः पथिनैवतुष्टमनसो यांतिस्वयंयोगिनः॥ ६२ ॥ ॥

तापसः अथवा योगीश्वरः किं योगीश्वरः तत्वनिवेशयेशलमतिः तत्वनिवेशाये पेशला मनोज्ञा म मुरः
तिर्यस्यासौ। एवंविधा निर्विकल्पास्त एव धन्याः॥ ६२ ॥ ॥ ॥ ॥ ॥ २०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे सखे हे मित्र तत एव धन्याः के विरलाः ये एवं प्रकारेण रात्रिं नयंति। किंभूता एते। सुकृतचयचित्तैकशरणाः॥
सुकृतानां चयः समूहः सुकृतचयस्तत्र सुकृतचयचित्ते एकं शरणं येषां ते सुकृतं। पुनः किं धन्याः त्रुटितभव
बंधव्यतिकराः त्रुटितो भवबंधस्य व्यतिकरो येषां ते वनांते वनमध्ये चित्तांतर्विषमाविषयाशीविषगताः

सखे धन्या केचित्त्रुटितभवबंधव्यतिकराः वनांते चित्तांतर्विषमविषया
शीविषगताः॥ शरच्चंद्रज्योत्स्नाधवलगगनाभोगसुभगां नयंत्येते रा
त्रिं सुकृतचयचित्तैकशरणाः॥ ६४ ॥

चित्तांतर्मनस्समध्ये विषमो यो सौ विषय एव आशीविषो दृष्टिविषो हि गोगतो येषां ते। चित्तांतविषम
विषयाशीर्विगलिता इति पाठः। किं रात्रिं शरच्चंद्रज्योत्स्नाधवलगगनाभोगसुभगा शरच्चंद्रस्य ज्योत्
स्नाया शरत्कालीनचंद्रमसः कांत्या धवलेन गगनाभोगेन नभोविस्तारेण सुभगा मनोज्ञा सा शरच्चंद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ॰टी॰ हे चेत। हे आत्मन् अधुना प्रसीद। प्रसादं कुरु। एतस्मादिंद्रियार्थगहनात् आयासकादाश्रयात्। कस्मि
२१ न् आश्रयः कदाश्रयस्तस्य भावः कदाश्रयः आयासेन काश्रयः आयासकालं दाश्रयस्तस्मात्। क्षणात् शां
तं भावमुपैहि। किंभूतं शांतं भावं श्रेयो मार्गं। मोक्षमार्गं। पुनः किंभूतं शांतं भावं। अशेषदुःखशमनव्या

एतस्माद्विरमेंद्रियार्थगहनादायासकादाश्रयात् श्रेयोमार्गमशेष
दुःखशमनव्यापारदक्षं क्षणात्॥ शांतं भावमुपैहि संत्यज निजां कल्लोल
लोलां गतिं मा भूयो भज भंगुरां भवरतिं चेतः प्रसीदाधुना॥ ६५ ॥

पारदक्षं अशेषाणि यानि दुःखानि तेषां शमनव्यापारे दक्षः अशेषदुःखस्तं हे चेत निजां कल्लोललोलां गुरुः
गतिं संत्यज परिहार। मा भूयो भंगुरां विनश्वराः भवरतिं भज। मा सेवय। एभिर्लक्षणैः संसारस्य २१
तुच्छत्वस्मात्। ततस्तस्मात् कारणात् निवेष्टितात् निस्पृहः॥ ६५ ॥ ॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे प्रणयिनि । हे प्रिये उत्तिष्ठ वनं यामः मत्रविवेकमूढमनसां मीश्वराणां नामापि न श्रूयते । किं
भूतानामीश्वराणां क्षुद्राणां तद्वनां प्रति किंभूतानामीश्वराणां । वित्तव्याधिविकारविकलगि

पुष्पैर्मूलफलैः प्रिये प्रणयिनी प्रीतिं कुरुष्वाधुना भूशय्यानववल्कलैर
करणैरुत्तिष्ठ यामो वयम् ॥ क्षुद्राणामविवेकमूढमनसां यत्रेश्वरा
णां सदा वित्तव्याधिविकारविकलगिरां नामापि न श्रूयते ॥ ६८ ॥

रां वित्तव्याधीनामविवेकेन विकला गीर्वाणी येषां ते तेषां हे प्रिये पुराणे पवित्रैर्मूलफलैः प्रीतिं कुरुष्व
अन्यच्च भूशय्या नववल्कलैः प्रीतिं कुरुष्व । किं वल्कलैः । अकरणैः क्रियन्ते इति करणानि न करणानि अक
रणैः नैः करुणाक्रियारहितैः ॥ ६९ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तरी हे वेतः सोहं मां जयतां दूरीक्रियतां रेख्रातिम् वंज्रार्द्धवृउामगौरातिसंतो षमुपार्जय। रेवेतः स्वर्ग
२२ नरंगिणीनठभुवां गंगानठभूमीनां। आ सं गं सं गति मत्नी ऊरुः नोऽस्माकं वा अथवा वी विभुक
ध्यो लेभुकः प्रलापाकः विश्वासः वान्यज्ञलभुहुदेभुवर्षा वारि संप्रुठभुकः प्रत्ययः। वान्यत्रा ङेभ्ये २८

सोहं मार्जयतां मुपार्जय रति वंज्रार्द्धवृउामगौ वेतः स्वर्गनरंगिणीनठ
भुवां मा सं गं सं गी ऊरू॥ नो वा वी विभुभुहुदेभुवताङे ङेभ्ये स्वाभुवस्त्री
वत्स्वालाये भुवदन्नाभुवमरि वे गो भुकः प्रत्ययः॥ ६१ ॥ ॥

खोसुसौदामिनीभुकः प्रत्ययः। यथा एते भुभ्यानेभुनोऽस्माकं वान्यत्री भुकः प्रत्ययः वान्यस्मा ठरः
लाये भुकः प्रत्ययः वान्यत्वारि वेगो भुतानीप्रवाहे भुकः प्रत्ययः यथा एतेभुभ्यानेनोऽस्माकं प्रमयो २२

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रेचेतो यदि एवमस्ति तदा भवरसास्वादने लंपटत्वं कुरु· एवं किं किं· यदि तदाग्रे स्फीतं प्रचुरगी
तं भवति। अन्यत्र पार्श्वतो दाक्षिणात्याः दक्षिणादेशीयाः सरसकवयो भवंति। अन्यद्यपश्चे

अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः पश्चे लीलावलयरणि
तं चामरग्राहिणीनां॥ यद्यस्त्येवं कुरु भवरसास्वादने लंपटत्वं नो
चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ॥ ६८ ॥ ॥

चामरग्राहिणीनां सुंदरीणां वलयरणितं भवति। कंकणानां शब्दं भवति। यद्येवं विधं सौख्यं भ
वति तदा संसारस्य ममतां कुरु। रे चेतः चेदेवं तदा सहसा निर्विकल्पे समाधौ प्रविश। प्रवेशं कुरु ६८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ· हे बुधा योषित्संगात्सुखाद्विरमततः। विरतिं गताः किं सुखात्। क्षणभंगुरात्। करुणा मैत्री प्रज्ञा व धूजन
२३ संगमं कुरुत। आविदधत। करुणा च मैत्री च प्रज्ञा च करुणा मैत्री प्रज्ञास्ता एव वधूजनस्तस्य संगमः करुणा

विरमत बुधा योषित्संगात्सुखात्क्षणभंगुरात्कुरुत करुणामैत्रीप्रज्ञावधूजनसंगमं
न खलु नरके हाराक्रांतं घनस्तनमंडलं शरणमथवा श्रोणीबिंबं रणन्मणिमेखलं ९९

मैत्रीप्रज्ञावाक्यं खलु निश्चितं। नरके घनस्तनमंडलं· अथवा श्रोणीबिंबं नितंबबिंबं शरणं किं स्तनमंडलं· हा गुरुः
राक्रांतं हारविभूषितं किं श्रोणीबिंबं रणन्मणिमेखलं· रणन्ती शब्दायमाना मणीनां मेखला यस्मिन् तत् शरणं: २३

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुपहतविधिश्रेयसां पुरुषाणां एषः। अन्य पमार्गेण श्रेयो येषां ते अनुपहतविधिश्रेयसस्तेषां पुरुषा
णामित्यर्थः। तेषामेव मार्गः। कएष मार्गः प्राणाघातान्निवृत्तिः जीवहिंसाविरमः परधनहरणे प
रद्रव्यापहारे संयमः यमउपरमेशांपूर्वः संयमनं संयमः परिहारः पुनः किं सत्यवाक्यं पुनः किं कालेश

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं युव
तिजनकथामूकभावः परेषाम्॥ तृष्णास्रोतो विभंगो गुरुषु च विनयः सर्व
भूतानुकंपा सामान्या सर्वशास्त्रेष्वनुपहतविधिश्रेयसामेष पंथाः॥७०॥

क्त्या प्रदानं पुनः किं परेषां युवतिजनकथामूकभावः। पुनः किं तृष्णास्रोतो विभंगः लोभप्रवाच्यगु
रुषु विनयः। सर्वभूतानुकंपा सर्वप्राणिदया। किंभूता प्राणिदया। सर्वशास्त्रेषु सामान्या सर्वे
नस्यभावः सामान्यं। समानभावात् इत्यर्थः। मोक्षमार्गेण एष मार्गः॥ ७० ॥ ॥ ९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ॰टी॰ हे मातर्लक्ष्मि कंचिदपरं भजस्व। मत्कांक्षिणी मास्म भूयाः वयं भोगेभ्यो न स्पृहयालवः नहि
२४ वः। निस्पृहाणां निरीहाणां त्वं कासि। वयं भिक्षाशक्तुभिरेव संप्रतीशानी वृत्तिं दिनगमनिकां स

मातर्लक्ष्मि भजस्व कंचिदपरं मत्कांक्षिणी मास्म भूर्भोगेभ्यः स्पृहयाल
वो न हि वयं का निस्पृहाणामसि॥ सद्यस्स्यूत पलाश पत्र पुटिका पात्रे
पवित्रीकृते भिक्षाशक्तुभिरेव संप्रति वयं वृत्तिं समीहामहे। ७१ ॥

मीहामहे। वांछामहे। क्षणमात्र तत्काल स्यूत पलाशपत्र पुटिका पात्रे पवित्रीकृते सति आयये वम गुरुः
स्माकं स्थितिस्तु तत्र या। किं क्रमः ७१ २४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे मित्र आवयोः रितिमतिरासीत् इयत्कालमिति। किं यूयं वयं वयं यूयं। इदानीमधुना किं जातं येन
यूयं वयं॥ ७२ ॥ हे बाले सुंदरी मा वक्रीनं लीलामुकुलितं अमी मंथरा दृष्टिपाताः अस्मासु किं

यूयं वयं वयं यूयमित्यासीन्मतिरावयोः॥ किं जातमधुना येन यूयं यूयं व
यं वयं॥ ७२ ॥ बाले लीलामुकुलितममी मंथरा दृष्टिपाताः किं क्षिप्यंते विरमविर
रम व्यर्थ एष श्रमस्ते॥ संप्रत्यन्ये वयमुपरतं बाल्यमास्था वनांते क्षीणो मोहस्तृ
णमिव जगज्जालमालोकयामः॥ ७३ ॥

क्षिप्यंते विरम विरम एष ते तव श्रमो व्यर्थो निरर्थकः संप्रति वयं अन्ये इति न भवामः अस्माकं वा
ल्यमुपरतं अस्माकमास्था वनांते क्षीणो मोहः तेन जगज्जालं विश्वसमूहं तृणमिवालोकयामः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ· इयं बालानां प्रति वक्षः नेत्रं अनवरतं नितरां CC-0. Digitized by eGangotri and MIDF- Delhi इंदीवरदलप्रभाचोरं इंदीवरस्य कमल
२५ स्य दलेन स्य प्रभा चोरयतीति इंदीवरं । अनया किमभिप्रेतं किं वांछितं । अस्माकं मोहो गतः स्मरकुसुम
बाणव्यतिकरज्वरज्वाला शांता वराकी तदपि न विरमति ॥ १४ ॥ संतः सत्पुरुषा वनांतं गताः किमिति

इमां बालामां प्रत्यनवरतमिंदीवरदलप्रभाचोरं चक्षुः क्षिपति किमभिप्रेतमनया
गतो मोहोस्माकं स्मरकुसुमबाणव्यतिकरज्वरज्वाला शांता तदपि न वराकी विरमति ॥ १४
रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं किं वा प्राणसमासमागमसुखं नैवाधिकं प्रीत
ये ॥ किंतूद्भ्रांतपतत्पतंगपवनव्यालोलदीपांकुरच्छायाचंचलमाकलय्य सततं संतो वनांतं

संभावनायां तेषां वसतये निवासाय हर्म्यतलं रम्यं नाभूत् किं तथापि संतो वनांतं गताः । वनं सेवयामासुः किं
कृत्वा उद्भ्रांतपतत्पतंगपवनव्यालोलदीपांकुरच्छायाचंचलं सकलं जीवलोकं आकलय्य ज्ञात्वेत्यर्थः हृदयेन ७५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यन्मुखतानां उर्जनानां मुखानि वीक्ष्यंते विलोक्यंते। यत्तदोर्नित्यसंबंधः तत्कंदरेभ्यः कंदरेभ्यः कंदाः प्रलयमुपग
ताः किं पर्वतेभ्यो निर्झराः प्रलयमुपगताः वाथवा वल्कलेभ्यस्तरुभ्यः शाखाः प्रध्वस्ता विनाशमुपजग्मुः किं
शाखाः सरसफलभृतः सरसानि फलानि बिभ्रतीति किं। खलानां प्रसन्नं यथा भवति। उपगतप्रश्रयाः

किं कंदाः कंदरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः प्रध्वस्ता वा तरुभ्यः सरस
फलभृतो वल्कलेभ्यश्च शाखाः॥ वीक्ष्यंते यन्मुखानि प्रसभमपगतप्रश्रया
णां खलानां दुःखोपात्ताल्पवित्तस्मयवशपवनानर्तितभ्रूलतानि॥ ७६॥

णां प्रोज्झितसज्जनवाणां। किं मुखानि दुःखोपात्ताल्पवित्तस्मयवशपवनानर्तितभ्रूलतानि दुःखेन उपा
त्तं उपार्जितं। यदल्पवित्तं तस्य स्मयवशपवनेनाभिमानावेन नर्तिता भ्रूलता येषां तानि॥ ७६ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDE- Delhi

भर्तृ मनुष्या यत्सावमानपरपिंडरता वर्तंते तानि किं हिमवतः स्थानानि प्रलयं गतानि किं हिमवतः स्थानानि गंगा
२६ तरंगकणशीकरशीतलानि गंगास्तरंगोत्सांकणशीकरैः शीतलानि पुनः किं हिमवतः विद्याधराध्युषितचा

गंगातरंगकणशीकरशीतलानि विद्याधराध्युषितचारुशिलातलानि ॥ स्था
नानि किं हिमवतः प्रलयं गतानि यत्सावमानपरपिंडरता मनुष्याः ॥७७॥

रुशिलातलानि विद्याधरैरध्युषितानि अधिष्ठितानि चारुशिलातलानि येषां तानि एवंविधानि स्थानानि १ उत्तृ
वेतनस्युस्तदा परतिरस्कारपिंडरता नराः भवेयुः एतावता परावमानात् एतान्येव स्थानानि सेवितानि वरम् १ २६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदाश्रीमेरुशृङ्गाणां तास्विनिहतो मेरुर्निपतति। समुद्राः क्षुभ्यन्ति किं· सकुद्राः प्रचुरनिकरग्राहनिरूपाः प्र
चुराश्च ते निकराः समूहाः। ग्राहाणां जलचरजीवानां निरूपाः स्वहाये प्राते प्रचुरः अपि पुनः धराव

यदामेरुः श्रीमान्निपतति युगान्ताग्निनिहतः समुद्राः क्षुभ्यन्ति प्र
चुरनिकरग्राहनिलयाः॥ धरा गच्छत्यन्तं धरणिधरपादैरपि
धृता॥ शरीरे का वार्ता करिकलभकर्णाग्रचपले॥ ७८ ॥ ॥

सुंधरा अन्तं गच्छति विलयं याति किंभूता धरा धरणिधरपादैर्धृतापि। अचलं चितापि तदा शरी
रे का वार्ता· किं शरीरे। करिकलभकर्णाग्रचपले। करिकलभानां कर्णाग्रचपले करि·तस्मिन्॥ ७८ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ० वै० हे शंभो हे प्रभो अहं तादृशः कदा भविष्यामि किंभूतो अहं एकाकी अद्वितीयः पुनः किं निःस्पृहः पुनः किं शां
२७ तः पुनः किं पाणिपात्रः पाणिरेव पात्रं भाण्डं यस्य पुनः किं दिगंबरः दिशा एव अंबरं वस्त्रं यस्य सः पुनः किं
कर्मनिर्मूलनक्षमः कर्मणां निर्मूलनं तत्र क्षमः कर्मनिर्मूलनक्षमः ॥ ७९ ॥ श्रियो लक्ष्म्यः प्राप्ताः ते

एकाकी निस्पृहः शांतः पाणिपात्रो दिगंबरः ॥ कदा शंभो भविष्यामि कर्मनि
र्मूलनक्षमः ॥ ७९ ॥ प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि
विद्विषतां ततः किं ॥ संमानिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृ
तां तनुभिस्ततः किं ८०

तः किं किं श्रियः सकलकामदुघाः समस्तमनोरथं दोग्ध्र्यः ॥ विद्विषां शिरसि अस्माकं पदं दत्तं ततः किं प्रण पु॰रु॰
यिनः स्नेहिनः विभवैर्धनैः संमानिताः ततः किं तनुभृतां प्राणिनां शरीरैः कल्पं कल्पपर्यन्तं यावत् स्थितं प्रा २७
णिनां ततः किं एतावता संसारस्य निर्मन्नतैव वरं ॥ ८० ॥ ॥

CC-0. Digitized by eGangotri and MIDP, Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतः परं वैराग्यमस्ति। नास्ति। किंभास्ति भवेमहेशे। अन्यच्च हृदिस्थं मरणजन्मभयं। अन्यच्च बंधुस्नेहेन। अन्यच्च म
न्मथजाः कामोद्भवविकारा न अन्यच्च वनितानां विज्ञनाजनरहिताः किंभूता वनिताः संसर्गदोषरहिताः अतो

भक्तिर्भवेमरणजन्मभयं हृदिस्थं स्नेहेन बंधुजनमन्मथजाः विकाराः॥ संसर्गदोष
रहिता विज्ञना वनिता ना वैराग्यमस्ति किमतः परमार्थनीयं॥ ८१ ॥ जीर्णाः कंथा ततः
किं सितममलपट्टपट्टसूत्रं ततः किं एका भार्या ततः किं हयकरिवरगणैरावृतो वा त
तः किं॥ भक्तं भुक्तं ततः किं कदशनमथवा वासरान्ते ततः किं व्यक्तं ज्योतिर्न वांतं मथित
भवभयं वैभवं वा ततः किं॥ ८२॥

पि वैराग्यं किमपि नास्ति। किंभूतं वैराग्यं परमार्थनीयं परमतत्त्वभूतं॥ ८१ ॥ जीर्णेतिसुगमं ८२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ· हे जना यदि मृषं वेतनस्थाः तत्तस्मात् ब्रह्म वा गता। किं ब्रह्म। अनंतं अंतरहितं। अजरं जरावर्जितं। पुनः किं परं ब्रह्म वि

२८ कासि। यस्य परब्रह्मणः इमे भुवनाधिपत्यभोगादयोऽनुषंगिणो भवंति। अनुषंगिनो वर्तंते। भुवनाधिपत्यभो

गादयः कृपणलोकरताः तुच्छजनविभ्रमाः॥ ८३ ॥ रे मूढ पातालमाविशसि। अन्यत्र नभः आकाशं विलंघ्य

तस्मादनंतमजरं परमं विकासि तद्ब्रह्म वांछत जना यदि चेतनस्थाः॥ यस्यानुषंगि

ण इमे भुवनाधिपत्यभोगादयः कृपणलोकरता भवंति॥ ८३ ॥ पातालमाविशसि

यासि नभो विलंघ्य दिङ्मंडलं भ्रमसि मानस चापलेन॥ भ्रांत्यापि जातु विमलं कथमा

त्मनीनं न ब्रह्म तात्स्मरसि निर्वृतिमेपि येन ८४

यासि अन्यत्र दिङ्मंडलं भ्रमसि के मानसचापलेन। मानसस्य चापलं तेन जातु कदाचित् भ्रांत्यापि तद्ब्र भर्तृः

ह्म कथं न स्मरसि। येन ब्रह्मणा निर्वृतिमेपि प्राप्नोषि। कीदृशं ब्रह्म आत्मनीनं आत्मने हितं आत्मनीनं २८

CC-0. Digitized by eGangotri and MIDF- Delhi

अहो इति खेदे। अमुना एवंविधेन संसारेण कदर्थिता मोहान्मोहात् कथं न लज्जामहे। कैः व्यापारैः पुनः
रुक्तभुक्तविषयैः पुनर्वारंवारं हितानि पुनरुक्तानि यानि भुक्तानि भोजनानि अन्यत्र विषयाः पुनरुक्तैः तैः बुधा
पंडिताः जंतवः प्राणिनः उद्यमिनः उद्यमवंतो धावंति। के भूत्वा जंतवः। तथैव पुनः पुनर्निभृतप्रारब्ध

रात्रिः सैव पुनः स एव दिवसो मत्वा बुधा जंतवो धावंत्युद्यमिनस्तथैव निभृतप्रा
रब्धतत्तत्क्रियाः॥ व्यापारैः पुनरुक्तभुक्तविषयैरेवंविधेनामुना संसारेण क
दर्थिताः कथमहो मोहान्न लज्जामहे॥ ८५ ॥

तत्तत्क्रियावारंवारं निभृताः प्रारब्धास्तत्तत्क्रिया यैस्ते किं कृत्वा। तां रात्रिं मत्वा वा अन्यं पुनस्तथैव दिवसं
मत्वा। यतः पुनरपि रजनी पुनरपि दिवसः पुनरपि मासः पुनरपि वर्षं पुनरपि ह्रस्वः पुनः बालः पु
नः पलितः समेति कालः। एवंविधसंसारस्वरूपं मत्वा। तस्माद्विरक्ता एव भवंति बुधाः न जडाः॥८५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ. २९ शांतो मुनिः सुखं यथा शेते। यस्य मुनेर्महीशय्या पृथिवी एव शयनं। यस्य मुनेर्विपुलं उपधानं भुजल
ता। यस्य विताने आकाशं। अयमनुकूलः शीतलपवनः व्यंजनं तालवृंतः। यस्य चंद्रः स्फुरद्दीपः। यस्य
विरतिवनितासंगमुदितः विरतिवनितायाः संगेन मुदितो हर्षितः मुनिः कइव नृप इव। यथा नृपम

CC-0. Digitized by eGangotri and MIDR- Delhi

महीशय्या रम्या विपुलमुपधानं भुजलता वितानं चाकाशं व्यजनमनुकूलोम
निलयं। स्फुरद्दीपश्चंद्रो विरतिवनितासंगमुदितः सुखं शांतः शेते मुनिरत
नुभूतिर्नृप इव॥ ८६॥

ही शय्या। पृथ्वी शयनीय शय्या भवति। अन्यस्य विपुलम् उपधानो वितती गंडुयो भवति। यस्य पु: २९
नकाशं प्रति मशको पा विताने भवति। यस्य व्यंजनानिले वीजितो भवति। अन्यस्य स्फुरद्दीपो
भवति। अन्यस्य वनितासंगप्राप्ति उदिता भवति। किं तु मुनिः यस्य नृपः अतनुभूतिः अतनी भूतिर्विभू

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे आत्मन्। तत्परं ब्रह्म लब्ध्वा भोगे रतिं मा कृथाः। यस्मिन्परब्रह्मणि एव निश्चयेन त्रैलोक्याधिपतित्वं विरसं वर्तते। किंभूते भोगे। आसनवस्त्रमानघटने। आसनं सिंहासनं च स्वासनादि वस्त्राणि वीनांशुकपट्टकूलानि मानं महत्त्वाभिमानादि तेषां घटनं। आसनवस्त्रमानघटनं तस्मिन्। एवं

त्रैलोक्याधिपतित्वमेव विरसं यस्मिन्महाशासने तल्लब्ध्वासन
वस्त्रमानघटने भोगे रतिं मा कृथाः। भोगः कोपि स एक एव परमो
नित्योदितो जृंभते यत्स्वादाद्विरसा भवंति विषयास्त्रैलोक्यराज्यादयः।

विधे भोगे का रतिः। कोपि संभोगः एक एव परब्रह्मणि नित्योदितः सन् उज्जृंभते। यत्स्वादाद्यस्य ब्रह्मणो रसास्वादात् त्रैलोक्यराज्यादयो विषया विरसा भवंति मोक्षदायकत्वात्॥ ७१ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्त्तृ॰ किं वेदाणि। वेदैः किं स्मृतिभिः किं पुराणपठनैः किं शास्त्रैः किं किं महाविस्तरैः महान् विस्तारो ये
३० षां तैः कर्मक्रियाविभ्रमैः किं किंभूतैः स्वर्गग्रामकुटीनिवासफलदैः स्वर्गग्रामकुटीः तस्या

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः स्वर्गग्रामकुटीनि
वासफलदैः कर्मक्रियाविभ्रमैः॥ मुक्त्वैकं भवदुःखभाररचनाविध्वं
सकालानलं स्वात्मानंदपदप्रवेशकलनं शेषा वणिग्वृत्तयः॥ ८८॥ ८८ उ॰

निवासफलं प्रददतीति। स्वर्गग्रामनैः एकं स्वात्मानंदप्रवेशकलनं मुक्त्वा स्वकीयो योसौ आत्मा त टी ३०
स्य यदानंदपदं। स्वात्मानंदपदं तस्य प्रवेशकलनं स्वात्मानंदः शेषाः क्रियाः वणिग्वृत्तयः वणिगा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे उन्नमा ब्रह्मणि परब्रह्मणि आसक्तचित्ता भवत यूयं । किं कर्तुं भवभयांभोधिपारं तरीतुं । भवभयां
भोधेः पारं संसारे सर्वमेतन्नस्थिरं किं किं । आयुः कल्लोललोलं । समुद्रकल्लोलवच्चपलं । यौवन
श्रीः कतिपयदिवसस्थायिनी । कतिपयदिवसान् स्थातुं शीलमस्याः सा । कतिपय । अर्थाः सं

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीरर्थाः संकल्पकल्पा घ
नसमयतडिद्विभ्रमा भोगपूराः ॥ कंठाश्लेषोपगूढं तदपि च न चिरं यत्प्रि
याभिः प्रणीतं ब्रह्मण्यासक्तचित्ता भवत भवभयांभोधिपारं तरीतुं ८२

कल्पाकल्पाः संकल्पतुल्याः । भोगपूराः घनसमयतडिद्विभ्रमाः । ये भोगाः ते घनसमयः । प्रियाभिः प्रणी
तं यत्कंठाश्लेषोपगूढं तदपि च न चिरं । तत्कारणात् परब्रह्म एव शरणं ॥ ८२ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मनस्विनो यतेंद्रियस्य । ब्रह्मांडमंडलीमात्रं CC-0. Digitized by eGangotri and MIDF, Delhi ब्रह्मांडस्य मंडली ब्रह्मांडमंडली सैव मात्रा
यस्य तत् । अथ शेषा फरीस्फुरितेन । आत्मिकावेष्टिते न जातु कदाचित् क्षोभता जायते । पितृना त
था मन्वादिभिः ॥ प्रतपस्य ब्रह्मांडलीलायतनं जायते ॥ २० ॥ यदा यस्मिन्प्रस्तावे ज्ञानमासीत् तदा इदमशेषं
जगदपि नारीमयं दृष्टं । किंभूतं अज्ञानं । स्मरतिमिरसंस्कारजनितं स्मरस्य कंदर्पस्य यत्तिमिरसंध

ब्रह्मांडमंडलीमात्रं किं लोभाय मनस्विनः । शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जाय
ते ॥ २० ॥ यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं तदा दृष्टं नारीमयमिदमशेषं जगद
पि । इदानीमस्माकं पटुतरविवेकांजनजुषां समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ २१

कारस्तस्य संस्कारेण पूर्वभावो जन्यपरिणामेन जनितं । इदानीं सांप्रतं अस्माकं समीभूता दृष्टिः मम
तापरिणामेनालंकृतेति । त्रिभुवनमपि ब्रह्म तनुते परब्रह्मस्वरूपा विलोकयति । किंभूतानामस्माकं पटु
तरविवेकांजनजुषां । अतिशयेन पटुः पटुतरो योसौ विवेकः पटुतरविवेकः सोञ्जनं पटुतरैः । तेषां अथवा

CC-0. Digitized by eGangotri and MIDF- Delhi

वंङ्गमरीवयोरम्याः वनांतस्थलीरम्या। किंस्थलीन्नगावनीरा वलाः नगायुना। साधुसमागमो
रम्यः ग्रामसुखं रम्यं। याचेपुरम्याकथा। अन्यश्च ब्रिमा याउरवं रम्यं। किंभूतं उरवं कोपो पाहितवा

रम्या वंङ्गमरीवयस्तगावतीरम्या वनांतस्थलीरम्यः साधुसमागमः श्र
मसुखं ज्ञाबेघुरम्याकथाः॥ कोपोपाहितवाप्य विंडुतरलं रम्यं प्रिया
याउरवंसर्वं रम्यमनित्यमनाउपगते विज्ञे न किंचिन्मन॥ ९१ ॥

प्य विंडुतरलंकोपापहितं। कोपाठे पेनानिवेशितं यन्नाप्यविंडुत्से न तरलं चंचलं कोपो। पुनर्नि
त्यताउपगते संप्राप्ते विज्ञे सर्वं न किंचिद्रम्यम्॥ ९२ ॥ ॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ एवंविधस्तपस्वी कश्चिद्विरलः स्थितो वर्त्तते। किं जनः भिक्षाशी भिक्षाभोजनः पुनः। किं जनः जनमध्यसंगर
३२ हितः पुनः। किं जनः सदास्वायत्तचेष्टः स्वाधीनमानसः परिणामः पुनः। किं जनः सदादानविरक्तमार्गनिरतः
दानं च आदानं च। दानादाने। तयोर्विरक्तमार्गः पुनः कीदृशो जनः रथ्याकीर्णविशीर्णजीर्णवसनैः संप्रा

भिक्षाशीजनमध्यसंगरहितः स्वायत्तचेष्टः सदा दानादानविरक्तमार्गनि
रतः कश्चित्तपस्वी स्थितः। रथ्याकीर्णविशीर्णजीर्णवसनैः संप्राप्तकंथा
सनो निर्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः॥ ९२ ॥ ॥

प्तकंथासनः रथ्यायाः कीर्णानि विशीर्णानि वसनानि रथ्यान्तैः कृत्वा संप्राप्ता कंथासनं येन स तथापि शुभः
नीमः पुनः कीदृशो जनः निर्मानिः गर्वरहितः अलज्जः पुनः कीदृशः जनः निरहंकृतिः निरहंकारः पुनः की ३२
दृशः जनः शमसुखाभोगैकबद्धस्पृहः शमस्य सुखं शमसुखं तस्य आभोगे विस्तारे एको बद्धा स्पृहा येन

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे मातर्हे मेदिनि हे तात हे मारुत सखे हे तेजः सुबंधो जल हे भ्रातर्व्योम भवतां पंचतत्त्वानां मेषः प्रणा
मांजलिर्बद्धोस्ति। तथा विधेयं। यथा ब्रह्मणि परे लीनो भवामि। किंभूतो हं। युष्मत्संगव

मातर्मेदिनि तात मारुत सखे तेजः सुबंधो जल भ्रातर्व्योम निबद्ध
एष भवतामंत्यप्रणामांजलिः॥ युष्मत्संगवशोपजातसुकृतोद्रेक
स्फुरन्निर्मलज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि॥ ९४

शोपजातसुकृतेन स्फुरं निर्मलज्ञानापास्तनिराकृतासमस्तामोहमहिमा। युष्माकं संगः युष्मत्सं
गस्तेनोपजात उत्पन्नो यो सौ सुकृतोद्रेकस्तस्य स्फुरं निर्मलज्ञानेन प्रयातास्ता निराकृता समस्ता मोहमहि
मा येन स युष्मत्संगः ९४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ विदुषापंडितेनआत्मश्रेयसितुमोक्षायतावदेवमहान्प्रयत्नःकार्य्यःयावदिदंकलेवरगृहं
३३ शरीरमंदिरंस्वस्थंवर्त्ततेसमाधनपरायणंवर्त्तते।यावच्चजरादूरेवर्त्तते।अन्यदिंद्रिय

यावत्स्वस्थमिदंकलेवरगृहंयावच्चदूरेजरायावच्चेंद्रियशक्तिरप्र
तिहतायावत्क्षयोनायुषः॥आत्मश्रेयसितावदेवविदुषाकार्य्यः
प्रयत्नोमहान्प्रदीप्तेभवनेतुकूपखननंप्रत्युद्यमःकीदृशः॥ ८५॥

शक्तिरप्रतिहतावर्त्तते।यावच्चआयुषःक्षयोनास्तितावदेवस्वहितेयत्नःकार्यः।भवनेगृहेउ गृहः
द्दीपितेसतिप्रदीप्तेसतिहिनिश्चितंकूपखननेकीदृशःप्रत्युद्यमः।नतुप्रदीप्तेसतिकूपख ३३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुविपुधियां विधानाम्कला किं विद्यावादिहृंदमनी। पुनः किं विद्याविनीतो नाविनयवंतपु
रुषयोग्या खड्गाग्रैः कुपाराधाराभि र्दशो नाकं स्वर्गलोकं नीतं न। कीदृशैः खड्गधाराग्रैः करिकुं

नाभ्यस्तामुविद्यादिहृंदमनी विद्याविनीतो विना खड्गाग्रैः करिकुंभपी
ठदलनैर्नीतं न नाकं यशः॥ कांता कोमलपल्लवाधररसः पीनो नवं
ऽशेदयेताऽरापंगतमेव निःफलमहो भूपालये दीपवत्॥ २६॥

भपीठदलनैः करिणांकुंभपीठं न दलने शीलं येषां ते करिणो वान्मथ्यं ओदये कांता कोमलपल्लवा
धररसो न पीतः। अहो श्रितिरवे देनारूरापं यौवनं निश्चलमेव गतं किंवत्। भूपालये दीपवत्॥ २६॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ सतांसत्पुरुषाणांज्ञानंमानमदादिनाशनंभवति।केषांचिदधमानां।एतत्ज्ञानंमदमानकारणंभ
३४ वति।अमुकंएवार्थंकविर्दृष्टांतेनदृढयति।यमिनांमुनीनांविविक्तंस्थानंएकांतप्रदेशःविमुक्त्यै

ज्ञानंसतांमानमदादिनाशनंकेषांचिदेतन्मदमानकारणम्॥
स्थानंविविक्तंयमिनांविमुक्त्यैकामातुराणामतिकामकारणं २७

येभवति·संसारखेदनाशाय।स्मात्।कामातुराणांअन्येषांविविक्तजनरहितंअतिकामकरणं उक्तं
भवतिकामविकारायस्मात्॥ २७ ॥ ॥ ॥ ॥ ३४

CC-0. Digitized by eGangotri and MIDF- Delhi

मनोरथाः स्वहृदये जीर्णा एव। यौवनं जराया ग्रस्तं इति विदेशान्यकुणाः वन्ध्यफलतां गुणज्ञैर्विना गताः। अक्षमी
वलवान्कालो यमः सहसा अभ्युपैति। किं युक्तं इति निश्चितं आसमंतात् ज्ञातं। त्रिपुरान्तकाङ्घ्रियुगलं मुक्त्वा अन्याग
तिर्नास्ति। किंभूतः कालः कृतांतः। कृतं अंतं कृतांतः॥ १८॥ प्राणी सलिलं स्वादु सुरभिः प्राणी क्षुधार्तः सन्

जीर्णा एव मनोरथाः स्वहृदये यातं जरा यौवनं हंतांगेषु गुणाश्च वंध्यफलतां याता गुणा
ज्ञैर्विना॥ किं युक्तं सहसाभ्युपैति बलवान्कालः कृतांतोऽक्षमी हा ज्ञातं त्रिपुरांतकांघ्रियु
गलं मुक्त्वास्ति नान्या गतिः॥ १८॥ तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि क्षुधार्तः स
न्शालीन्कवलयति शाकादिवलितान्॥ प्रदीप्ते रागाग्नौ सुदृढतरमाश्लिष्यति वधूं प्रतीकारो व्या
धेः सुखमिति विपर्यस्यति जनः॥ १९॥

शालीन्कवलयति। कीदृशान् शाकादिवलितान्। रागाग्नौ प्रदीप्ते सति
सुदृढतरं यथा भवति। वधूं भार्यां आश्लिष्यति आलिंगते। जनः प्राणी। आधेः प्रतीकारं उपचारः सुखमिति विपर्य
ति। विपर्यासं करोति॥ १९॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ: हे स्मरारे कदाहं दुःखान्मोक्ष्ये किं कृत्वा। गांगैः पयोभिः त्वां स्नात्वा। हे विभो त्वां त्वां शुचिकुसुमफलैरर्चयित्वा। क्षि
३५ तिधरकुहरग्रावपर्यंकमूले ध्येये कर्मणि ध्यानं निवेश्य। क्षितिधरस्य कुहरं क्षितिधरकुहरं तस्य य

स्नात्वा गांगैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां ध्येये ध्यानं नियोज्यं
क्षितिधरकुहरग्रावपर्यंकमूले॥ आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्र
सादात्स्मरारे दुःखान्मोक्षे कदाहं नववरणनरो ध्यानमार्गैकप्रसक्तः॥ १००॥

ग्रावं तं देवपर्यंकं यस्य तन्मूलं क्षितिनाम्नि किंभूतोहं आत्मारामः पुनः किं अहं त्वत्प्रसादात् गुरुवचन भर्तृ:
रतः पुनः किं अहं ध्यानमार्गैकप्रसक्तः नववरणोरतः॥ १००॥ ॥ ॥ ॥ ३५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

येषां ब्रह्मरतानां एवंविधा स्थितिः अहमेवं मन्ये। त एव परमेश्वराः। सा का स्थितिः शैलशिला शय्या।
गिरिगुहा गृहं तरूणां त्वचो वस्त्रं सुहृदः सारंगमृगाः ननु निश्चितं क्षितिरुहां वृक्षाणां कोमलैः

शय्या शैलशिला गृहं गिरिगुहा वस्त्रं तरूणां त्वचः सारंगाः सुहृदो ननु क्षिति
रुहां वृत्तिः फलैः कोमलैः॥ येषां निर्झरमंबुपानमुचितं रत्यैव विद्यांग
ना मन्ये ते परमेश्वराः शिरसि यैर्बद्धो न सेवांजलिम्॥ १०१ ॥ ॥

फलैर्वृत्तिः निर्झरमंबुपानं एवं निश्चयेन रत्या सहैव वनिता अंगना विद्या एषामिति स्थितिः ते ईश्व
राः यैः क्षितीशसेवांजलिर्न बद्धः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ· हि निश्चितं। यदि स्वे कुटुंबे स्वकीये अनुकंपां कृपां न बिभृयात्। यतस्ततो निःस्वत्वसंबंध इति न्यायात्। तदा को
३६ ऽयं विद्वान् अतीव दुःखासिकानां नारीणां वक्त्रं वीक्ष्येत्। अपि तु कोऽपि न। कया विपत्तिज्वरजनितरुजा। विप
त्तिरेव ज्वरस्तेन जनिता या रुक् विपत्तिः तया। कस्यां सत्यां त्रिलोकीसरितं गंगायां सत्यामेव। किंभूते सरित

सत्यामेव त्रिलोकीसरिति हरशिरश्चुंबिनीविच्छटायां सद्वृत्तिं कल्पयन्त्यां तटविट
पभवैर्वल्कलैः सत्फलैश्च॥ कोऽयं विद्वान् विपत्तिज्वरजनितरुजातीवदुःखा
सिकानां वक्त्रं वीक्ष्येत दुःस्थो यदि हि न बिभृयात्स्वे कुटुंबेऽनुकंपां॥ १०२ ॥ ॥

हरशिरश्चुंबिनीविच्छटायां हरशिरश्चुंबिनी ईश्वरमस्तकस्पर्शिनी विच्छटा कांतिर्न। देहो यस्याः सा हर
शिरसि। तस्यां पुनः किंभूतायां त्रिलोकीसरिति। सद्वृत्तं समीचीना वार्ता कल्पयन्त्यां केः सत्फलैः उ·ह·
वा अन्यैर्वल्कलैः। किंभूतैः सत्फलैः वल्कलैः तटविटपभवैः तटवृक्षोद्भवैः॥ १०२ ॥ ॥ ३६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तां काशीं परिहृत्य पारिलक्ष्या। हृंत हंति खेदे विबुधैः किमन्यत्र स्थीयते। अपितु न यस्यां काश्यां कुत्याने
कुसुमितविचित्रभोजनाविधिः वान्यती आसितीग्रं नयः वान्यत्र वस्त्रं कौपीनावरणं मंडनं वान्यग्रस्या अ

उद्याने कुसुमितविचित्रभोजनविधिस्तीर्णातिर्भाग्नं नपः कौपीनावरणं सुव
मसिततं भिक्षाटनं मरणं उनम्॥ आसन्नं मरणं च मंगलसमं यस्यां सम
स्यायते तां काशीं परिहृत्य हंत विबुधैरन्यत्र किं स्थीयते॥ १०३॥

सितं भिक्षाटनं वान्यग्रस्यां काश्यां मंगलसमं आसन्नं मरणं समुत्पद्यते। तां काशीं त्यक्त्वाऽन्यत्र कथं
स्थीयते॥ १०३॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ यदि प्रभुः स्वामी ये ... द्वारेषु अस्माभिः स्थित्वा द्रक्ष्यति कुप्यति । इतीति किं । नायं ते समयः प्रस्तावो नास्ति
३७ अधुना रहस्यमंत्रालोचनावसरः स्वामी निद्राति प्रमीलां भजते तोरवेतस्तान् भूत्वा पदहाय विश्वेशितुः प
रमेश्वरस्य महेश्वरभवनं याहि । किं भवनं निर्दौवारिकनिर्दयोक्त्यपरुषं कोऽर्थः निर्गतो दौवारि

नायं ते समयो रहस्यमधुना निद्राति नाथो यदि स्थित्वा द्रक्ष्यति कुप्यति
प्रभुरिति द्वारेषु येषां वचः । चेतस्तानपहाय याहि भवनं देवस्य विश्वे
शितुर्निर्दौवारिकनिर्दयोक्त्यपरुषं निःसीमशर्मप्रदम् ॥ १०४ ॥

कोऽयस्मात्तं निर्दौवारिकं प्रतिहाररहितं निर्दयोक्त्या कठोरवाक्या अपगतो रुट् कोपो यस्मात्तन्निर्द
योक्त्यपरुषं । निर्दौवारिकं च निर्दयोक्त्यपरुषं च निर्दौवारि । ननु किं भवनं निःसीमशर्मप्रदं निः उ. श.
सीमं सीमातीतं शर्म सुखं प्रददाति निजं अनर्गलसौख्यदायिकम् ॥ १०४ ॥ ॥ ३७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे प्रियसखे त्वं विधिपराङ्मुखो दैवः अन्ये इदानीं नो जानीमः किं विधास्यति। अयं विधिः चिंताचक्रे निधाय
बलात् पिंडीकृत्य मनो भ्रमयति। किंभूते चिंताचक्रे विपद्दंड भ्रांतप्रपातपरंपरापरिचयबले। विपदे
व दंडो विपद्दंडः तस्य भ्रांतः सम्यक् तस्य यः प्रपातपरंपरा तस्याः परिचयेन बलं यस्य बलः विपद्

प्रियसखि विपद्दंडभ्रांतप्रपातपरंपरापरिचयबले चिंताचक्रे वि
धिर्बलः पराङ्मुखः ।। मृदमिव बलात् पिंडीकृत्य प्रगल्भकुलाल
वत् भ्रमयति मनो नो जानीमः किमत्र विधास्यति ।। १०५ ।। ।।

भ्रांते तस्मिन् मनः कमिवा मृदमिव विधिः कर्त्तेव प्रगल्भकुलालवत्। यथा प्रगल्भः कुलालो मृदं ६
मृत्तिकं बलात् पिंडीकृत्य चक्रे निधाय भ्रमयति। एतावता विपरीते विधेर्विलसितं कोपि न वेत्ति:

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDE- Delhi

भ०टी मे मम महेश्वरे वाऽथवा जनार्दने वासुदेवे भेदहेतुः प्रतिपत्तिर्नास्ति। किंभूते महेश्वरे त्रिभुवनस्या
३८ धिपतौ। कीदृशे जनार्दने। जगदन्तरात्मनि। जगतां विश्वत्रयाणाम् अन्तरात्मा। जगदन्तरात्मा। त

महेश्वरो वा जगतामधीश्वरे जनार्दने वा जगतां तरात्मनि ॥
नयोर्विभेदः क्वचिदेव नास्ति तथापि भक्तिस्तरुणेन्दुशेखरे १०६

स्मिन्। उभयोर्देवयोर्मे मम वेत्तस्यान्तरं नास्ति। एवं सत्यपि। तथापि तरुणेन्दुशेखरे श्रीमहेशे भक्तिः १०६ पुस्तः ३८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रे कंदर्प कोदंड टंकाररवैः करं किं कदर्थयसि। रे कोकिलः कोमलैः कलरवैः पंचस्वरैः किं वृथा जल्पसि। हे मु
ग्धे त्वं कटाक्षैरलं पूर्य्यतां। किंभूतैः कटाक्षैः। स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षे अलं क्षेपैः। त्वि

रे कंदर्प्प करं कदर्थयसि किं कोदण्ड टंकाररवैः रे रे कोकिल कोमलैः कलरवैः किं
त्वं वृथा जल्पसि॥ मुग्धे स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं वे
तश्चुंबितचंद्रचूडचरणाध्यानामृतं वर्त्तते॥ १०७ ॥ ॥ ॥

ग्धमुग्धविदग्धमधुरश्च्यक्षेपोपेयांते। स्निग्धः तैः भवतां पर्वेक्षणानां कृतं सततं निखिलमपि व्यर्थं
अस्माकं चेतश्चुंबितचंद्रचूडध्यानामृतं वर्त्तते। चुंबितश्चंद्रचूडस्य महेशस्य चरणध्यानामृतं येन
तत् चुंबितचंद्रः॥ १०७ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ योगी सर्वसंगपरित्यागी सुखं तिष्ठति। किंभूतो योगी। ध्वस्ताशेषमदप्रमोदमुदितः ध्वस्ता निरा
३९ कृता अशेषा मदप्रमोदा येन सः। तेन मुदितः ध्वस्ताशेषमदः यस्य योगिनः शतखंडजर्जर
तरं कौपीनं। पुनः कंथा तादृशी पूर्वोक्ता शतखंडजर्जरतरा निश्चिन्तं असनं। किंभूतमश

कौपीनं शतखंडजर्जरतरं कंथा पुनस्तादृशी निश्चिंतं सुखसाध्यभै
क्ष्यमशनं शय्या श्मशाने वने। मित्रामित्रसमानतातिविमला चिंता
च शून्यालये ध्वस्ताशेषमदप्रमोदमुदितो योगी सुखं तिष्ठति १८

नं सुखसाध्यभैक्ष्यं सुखेन साध्यम् एवंविधायामि शांतस्यासुन्यन्नं सुरसं। अन्यच्च शय्या श्मशाने व
ने तेन था पि मित्रसमानता मित्रश्च अमित्रश्च मित्रामित्रौ तयोः सा दृश्यता। न्या यस्य सुः अन्यच्च शून्य गुरुः
स्थालये ऽतिविमला ऽतिनिर्मला भवत्या ध्यानलक्षणा चिंता अतः कारणात् योगी निर्भयः सन् सुखं तिष्ठति ३९

CC-0. Digitized by eGangotri and MIDF- Delhi

रेलोकाः चेष्टितैर्नवनवविकल्पव्यापारैः कृतं पूर्यतां यदि वेदस्मद्वचः श्रद्धयापोग्यं श्रद्धेयं अन्तम
तव्यमित्यर्थः। तदा स्वधामनि स्वकीयशरीरमंदिरे कामोच्छित्तिवशे कंदर्पजयार्थं केवलं चेतः स
माधीयतां। किंभूतं चेतः आशापाशशतोपशांतिविशदं आपाशस्य शतं आशापाशशतं तस्योपशां

भोगा भंगुरवृत्तयो बहुविधास्तैरेव चायं भवस्तत्कस्येह कृते परिभ्रमत
रे लोकाः कृतं चेष्टितैः॥ आशापाशशतोपशांतिविशदं चेतः समाधी
यतां कामोच्छित्तिवशे स्वधामनि यदि श्रद्धेयमस्मद्वचः॥ १०९ ॥

त्या विशदं निर्मलं आज्ञा। तथा भोगाः भंगुरवृत्तयः भंगुरा विनश्वरा वृत्तिर्येषां ते किं भोगाः बहु
विधाः अनेकप्रकाराः एवं निश्चयेन बहुविधैर्भोगैरयं भवः संसारः एवं रे लोकाः तत्तस्मात्कारणा
त् कस्य कृतं परिभ्रमत तत्र मया ज्ञात ॥१०२॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ ४० धन्यानां मनुष्याणां एवं स्थिम्या आ... [illegible] CC-0. Digitized by eGangotri and MIDF- Delhi ...गिरिकंदरे निवसतां धन्यानां किं कुर्वतां
परं ज्योतिर्ध्यायतां । येषां किं धन्यानां । आनंदाश्रुजलं निःशंकं शंकारहितं शकुनाः पक्षिणः पिबं
ति । किंभूताः शकुनाः अंकेशयाः उत्संगगताः तु पुनः अस्माकं मंदभाग्यानां । आयुरेवं मनोर

धन्यानां गिरिकंदरे निवसतां ज्योतिः परं ध्यायतां आनंदाश्रुजलं पि
बंति शकुनाः निःशंकमंकेशयाः ॥ अस्माकं तु मनोरथैः परिरचित प्रा
साद वापीतटक्रीडाकाननकेलि कौतुकजुषामायुः परिक्षीयते ॥१०

थैः परिक्षीयते किंभूतानामस्माकं । परिरचितप्रासादवापीतटक्रीडाकाननकेलिकौतुक उक्त
जुषां परिरचिता या प्रासादवापीतटक्रीडाकाननकेलयस्तासां कौतुकं जुषंतीति प्रासादवापीते ४०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एभिः प्रकारैः किंन ग्रस्तं। अन्यच्च कैः जनानश्वरस्ताः। मरणेन जन्म आक्रान्तं स्वच्छम् अत्युज्ज्वलं यौवनं ज
रसा आक्रान्तं सन्तुष्टं धनलिप्सया संतोषः आक्रान्तः प्रौढाङ्गनाविभ्रमैः शमसुखं आक्रान्तं निरन्तरं म

आक्रान्तं मरणेन जन्म जरया चात्युज्ज्वलं यौवनं संतोषो धनलिप्सया शा
मसुखं प्रौढाङ्गनाविभ्रमैः। लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृ
पा दुर्जनैरस्थैर्येण विभूतिरप्यपहता ग्रस्तं न कालेन किम्॥ १११॥

त्सरिभिर्लोकैर्गुणा आक्रान्ता विनाशिताः। व्यालैर्दुष्टजन्तुभिः वनभुवः आक्रान्ताः दुर्जनैर्नृपा भूपाला आ
क्रान्ता ग्रस्ताः। विभूतिरप्यस्थैर्येण अपहृता नाहि कालेन किंन विनष्टं किं किंन विनश्यति॥ १११

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्त. ८१ नामइति संबोधनेन त्वं जन्मिरं कुशोनक्रियाकेन विधिना येन कुस्थितां निर्मितं किं न वपसि
शरीरे। आधिव्याधिशतैः जितराम् निशापेन। आरोग्य मुन्मीलयते न च आधिर्मा न मा पीडा व्या
धिरोग सम्भवः। वान्य शान्तिं दे वनिर्मितो लक्ष्मीः पतन् ग्नि वत्तापक्षिपत्र। पतन रयाना व

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मील्यते लक्ष्मीर्यत्र पतन्ति
तत्र विवृतद्वारा इव व्यापदः। जातं जातमवश्यमाशु विवशं मृत्युः क
रोत्यात्मसात् तत्किं नाम निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम्॥ ९२

न्ति। आपद विवृतद्वारा इवाउच्छादितकपाटा इव दर्शितो। अवश्यं निश्चितं। आशु शीघ्रं मृत्युर्यमः जा गु.र. ८१
तं जातं उत्पन्नं उत्पन्नं आत्मसात्करोति स्व आत्माधीनं विरोधे आत्मा भवत्येन स्थानिर्मितोऽपि सुस्थिरं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रे मनुष्या वदं तु कथयं तु यदि स्वे त्संसारे स्वल्पमपि सुखं किंचिदस्ति। गर्भमध्ये कृच्छ्रेण कष्टेन नियमितत
नुभिः शंकोचितशरीरैः स्थीयते गर्भमध्ये अमेध्यमध्ये यस्मात् दमेध्यमध्यं तस्मिन्। अस्मिन्संसारे यौव
ने विप्रयोगः किंभूते यौवने। कांताविश्लेषदुःखव्यतिकरविषमे कांताया विश्लेषः कांताविश्लेष

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भमध्ये कांताविश्लेषदुःख
व्यतिकरविषमे यौवने विप्रयोगः॥ नारीणामप्यवज्ञा विलसति नियतं वृ
द्धभावेप्यसाधुः संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित्॥

तस्य यो सौ दुःखव्यतिकरस्तेन विषमः कांता। तस्मिन् अपि तु पुनर्नारीणामवज्ञा अवगणनं विलस
ति। अपि तु निर्णीयतं निश्चितं वृद्धभावः असाधुः अस्मात्कारणात् संसारे किमपि सौख्यं नास्ति १२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृ प्राणिनां सौख्यं कुतः। कथं नृणां मनुष्याणां आयुर्वर्षशतं परिमितं। तस्यायुषो वर्षशतप्रमाणस्य अर्द्धं
४२ रात्रौ गतं। शयानस्य। ततोऽन्यत् रं शेषं पंचाशत्। तस्यार्द्धं पंचाशदर्द्धस्य कराविदपि अधिकमर्द्धम

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्धं गतं तस्यार्द्धस्य कराविदर्द्धमधिकं
बाल्यत्ववृद्धत्वयोः॥ शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरंगबुद्बुदचये सौख्यं कुतः प्राणिनाम्॥ ११४॥ ॥

पि बाल्यत्ववृद्धत्वयोर्गतं। शेषं मनुष्याणां व्याधिवियोगशोकसहितं सेवादिभिः कर्मभिर्नीयते। किं जीवे गुरु:
जीवितव्ये वारितरंगचंचलतरे वारितः समुद्रस्य तरंगाः तद्वच्चंचलतरे ११४ इति भर्तृहरिकाव्ये वैरा ४२
ग्यशतकं तृतीयं समाप्तम्॥ शुभं॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूत्रं॥ अभिमतमहामानग्रंथिप्रभेदपटीयसीगुरुतरगुणग्रामांभोजस्फुटोदयचंद्रिका। विपु
लविलसल्लज्जावल्लीवितानकुठारिकाजठरपिठरीदुःपूरेयंकरोतिविडंबनां॥ १ ॥क्षणांबालोभूत्वा
क्षणमपियुवाकामरसिकःक्षणंवित्तैर्हीनःक्षणमपिचसंपूर्णविभवः॥जराजीर्णैरंगैर्नटइववली
मंडिततनुर्नरःसंसारांकेविशतियमधानीजवनिकां॥ २ ॥पातालान्नसमुद्धृतोवतबलिर्मृत्युर्न
नीतःक्षयंनोमृष्टंशशलांछनस्यमलिननोन्मूलितान्याधयः॥शेषस्यापिधरांविधृत्यनकृतोभारा
वतारःक्षणांवेतःसत्पुरुषाभिमानपदवींमिथ्यावहन्खिद्यते॥ ३ ॥नोविद्यामगणायोनकल्पनर
वोनाष्टोमहासिद्धयस्तावद्देशवशाःपरोपकृतयोनास्माभिरप्यर्जिताः॥नेदंमजुतिमानसंयव
पलंकुस्मामनाभोनिधौयेकृपिकृकर्मकटीमिमान्तदपितन्यक्वंवयंशाकुमः॥ ४ ॥वर्णाश्रितंकृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्निवीश्यासिरोरुहाणांस्थानंपरंपरिभवस्यतदेवपुंसां॥आरोपितास्थिशकलंपरिहृत्ययां
न्तिचाण्डालकूपमिवदूरतरंतरुण्यः॥ ५ ॥गर्भावासेशयित्वाकलिमलनिलयेपूतिमध्येज
घन्येक्लीकृत्सौपीडितांगःकथमपिविवराह्निर्गतःस्रोदक्लिन्नः॥भूयस्तत्रैवरागःप्रकृतिरह
न्तोमंदबुद्धिर्दुरात्मासोयंसंसारचक्रेभ्रमतिशयमपेलोकमध्येयथाधः॥ ६ ॥गात्रंसंकु
चितंगतिर्विगलितादंताश्चनाशंगताद्दृष्टिंनश्यपतिरूपमेवह्रसितंवक्रंवलालायते॥वाक्यं
नैवकरोतिबांधवजनोभार्यानशुश्रूषतेहाकष्टंजनयाभिभूतपुरुषःपुत्रैरवज्ञायते
॥ ७ ॥चलालक्ष्मीश्चलाःप्राणाश्चलंजीवितयौवनं॥चलाचलेहिसंसारेधर्मेकोहि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भर्तृ· निश्चलः ॥ ९ ॥स्नानशैलसन्निधाने त्रिवलि नदी नीर कोटरे तत्र· जगदपि नम्नी विहितं त
४४ थापि पंवे ष्वो रेणा· सरस्वा सप्त दन्ता सा माला कारा छ वर्णा मम मूर्त्तिः । आपाप्नि तथा व भापानि
लभ्यते पुण्यहीनेन ॥ १० ॥अशीमहि वयं भिक्षामाशावासो वसीमहि ॥शयीमहि महीपृ
ष्ठे कुर्वीमहि किमीश्वरैः ॥ ११ ॥ ॥इति भर्तृहरिकृतं काव्यं समाप्तं ॥ ॥शुभमस्तु ॥

श्रीः
४४

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भर्तृहरिवैराग्यशतक ग्रंथसंख्या ७५०

८८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi